II

7080

1. Title Bhāgavata Purāṇa. Pañcham Skaṇḍha
2. Accession No. 5536
3. Folio No./Pages 81
4. Lines 15-16
5. Size 37 × 22 cm.
6. Substance Paper
7. Script Devanāgarī
8. Language Sanskṛit
9. Period Not mentioned
10. Beginning "ओम् श्री गणेशाय नमः ओम् अथातः पंचम-स्कंध व्याख्याने क विशेष वान् ।।"
11. End "दीपिकायां पंचमस्कंधे नरकानुवर्णन नाम षड्विंशतितमोध्याय ।। पंचम स्कंधं समाप्तः ।।"
12. Colophon No
13. Illustrations No
14. Source Donation
15. Subject Purāṇa
16. Revisor No
17. Author Not Known
18. Remarks Pages are not in order, pages are partly damaged by termite, bound.

श्री भाग टी

ॐ श्रीगणेशाय नमः ॐ अथातः पंचमस्कंधव्याख्यानेकविशेषवान् ॥ प्रियव्रतान्वयोत्र सप्रपंचः प्रपंच्यते ॥ षड्विं-
शत्याध्यायैः पंचमे स्थानमीर्यते लोकद्वीपादिमर्यादापालनं बलमनेकधा ॥ स्थितिस्तु पर्यंतो लोके मर्यादा त्रि-
विधा मता ॥ अनंतेष्वेकेकशस्तत्र मर्यादा वक्ष्यामहे ॥ भुवि द्वीपादिमर्यादा पाल्यते राजभिः पृथक् ॥ भूमेरुपरि दि-
वा त्रैलतः ज्योतिषां गणादिभिः ॥ तत्राध्यायैस्त्रिविंशत्या प्रियव्रतमुखैः सदैः ॥ भुवो द्वीपादिमर्यादा पालिता इति वर्ण्यते ॥
त्रिभिः सूर्यादिभिर्ज्योतिश्चक्रादिस्थितिकीर्त्यते ॥ अतलादिषु भावाद्यैः पालनं च ततस्त्रिभिः ॥ तत्र तु प्रथमेऽध्याये तु

ॐ श्रीराजोवाच ॥ ॐ प्रियव्रतो भागवत आत्मारामः कथं मुने ॥ गृहेरमत यन्मूलः कर्मबंधः पराभवः १
नूनं न मुक्तसंगानां तादृशानां द्विजर्षभ ॥ गृहेष्वभिनिवेशोयं पुंसां भवितुमर्हति ॥ २ ॥ ॥ रामजी

निवेशो राजविवृत्तिः ॥ पुनः सृष्टानन्निष्टेति प्रियव्रतकथाद्भुता ॥ वंशं प्रियव्रतस्याथ निर्बोध नृपसत्तम ॥ यो नारदा-
दात्मविद्यागमिमामस्य पुनर्महीं ॥ भुक्त्वा विभज्य पुत्रेभ्य ऐश्वर्यं समगात्पदमिति ॥ सर्वस्कंधे यातेउक्तं ॥ प्रियव्रतस्य
प्रथमं क्रौंत्मविद्या ॥ ततो गृहाश्रमः ॥ ततः संगत्यागो ॥ मोक्षश्चेति तत्र विस्मितः पृच्छति ॥ प्रिय इति भागव-
तः ॥ अत एवात्मारामः ॥ इह कथमरमत ॥ ननु रमतां को दोष इति वदन्नाह कर्मणा बंधः पराभवः स्व-
नृपतिरस्माद्बोधमूलो भवति ॥ ननु तर्हि मूलेषामपि यस्य गृहेष्वभिनिवेशः स्यात् ॥ स च भागवतानामा-
त्मारामाणामपि भवतीत्याह ॥ नूनमिति ॥ २ ॥

यद

रम २

गृहासक्तिर्हि कुटुम्बस्पृहया भवति ॥ सा च तेषां नास्तीत्याह ॥ महतामिति उत्तमश्लोकपादयोः छायाकामादिसंतापहारिणी ॥ तया निर्वृतं चित्तं येषां स्पृहा प्रकामं मतिर्नास्ति ॥ दारागारसक्तस्य तु मोक्षः ॥ श्रीकृष्णे स्खलितामतिः स्यादित्ययं ॥ अयं च महान् संशय इत्याह ॥ संशय इति ॥ ४ ॥ अंगीकृत्य परिहरति बाढमभिनिवेशादिकं नास्तीति सत्यं भवतः पापि विघ्नवशेन तेषां प्रवृत्तिः ॥ पूर्वाभ्यासबलेन पुनर्निवृत्तिः स्यादेवेत्याह ॥ भगवतः श्रीमच्चरणारविंदमकरंदरसे आवेशितं चेतो येषां ॥ तेषांपि केनचिदंतरायेण विघ्नेन विहतापि ॥ स्वां शिवतमां

महतां खलु विप्रर्षे उत्तमश्लोकपादयोः ॥ छायानिर्वृतचित्तानां न कुटुंबे स्पृहामतिः ॥ २
संशयोयं महान् ब्रह्मन् दारागारसुतादिषु ॥ सक्तस्य यत्सिद्धिरभूत् कृष्णे च मतिरच्युता ॥ ४ ॥ श्रीशुक उवाच ॥ बाढमुक्तं भगवत उत्तमश्लोकस्य श्रीमच्चरणारविंद मकरंदरस आवेशितचेतसो भागवतपरमहंसदयितकथां किंचिदंतरायविहतां ॥ स्वां शिवतमां पदवीं न प्रायेण हिन्वंति ॥ ५ ॥ ॥ ॐ रामाय नमो नमः ॥ ॥ राम

पदवीं मार्गं न हि न्वंति न त्यजंति ॥ कांतां भागवता एव परमहंसाः तेषां दयितस्य प्रियस्य श्रीवासुदेवस्य कथां न त्यजंति ॥ ५ ॥ प्रियव्रतस्य ज्ञानस्यांतेवासिनोरायनुपावर्भवति सप्रसंगमाह ॥ यर्हीत्यादिना विमुक्तसंगः प्रकृतिभजत्येव सेतेन यर्हि वाव ह यदा हि वा वेति प्रसिद्धादौ ह इति च ॥ सः स्वपित्रामंत्रितावनितलपरिपालनाय उपामंत्रितोपि विमुक्तो नैवाभ्यनंदत् नैच्छत् ॥ अथ हतदेवभगवान् आदिदेवो ब्रह्मा स्वभवनाद्देवतान्वयः ॥ उपामंत्रितोहेतुः आम्नातः राज्ञां शास्त्रेण गुणाः ॥ ये प्रवराः श्रेष्ठाः गुणाः ॥ तेषां गणस्यैकांतभाजनतया नियतया अयवेन ॥ अतिकृ

श्री॰
भा॰पं॰
टी॰
२

र्थं हेतुः॥ परमार्थसतत्त्वं आत्मयाथात्म्यं अवगतं येन सः ... अतः ब्रह्मसत्रेण आत्माभ्यासेन कार्येण आदीक्षिष्यमा
णः॥ नियमं गृहीष्यन्॥ प्रागपि वासुदेवे एव निरंतरसमाधियोगेन चित्तैकाग्र्येण समावेशितः समर्पितः॥ सक
लकारकाणामिंद्रियाणां यः क्रियाकलापो येन सः॥ न यथापितृमितोक्तं न बहुमतवान्॥ तथापि तदधिक
रणे राज्याधिकारे असतो विषयादपि राज्यप्रपंचादात्मनः पराभवमालोचयन् नाभ्यनंदत्॥६॥ गुणविस

स हि वाव ह राजन्न् राजपुत्रः प्रियव्रतः परमभागवतो नारदस्य चरणोपसेवयांजसावगतपरमार्थसत
त्त्वो ब्रह्मसत्रेण दीक्षिष्यमाणो ऽवनितलपरिपालनायाम्नातप्रवरगुणगणैकांतभाजनतया स्वपित्रो
पामंत्रितो भगवति वासुदेव एवाव्यवधानसमाधियोगेन समावेशितसकलकारकक्रियाकलापो नैवाभ्य
नंदद्यद्यपि तदप्रत्याम्नातव्यं तदधिकरण आत्मनोन्यस्माद सतोपि पराभवमन्वीक्षमाणः॥६॥ अथ ह भ
गवानादिदेव एतस्य गुणविसर्गस्य परिबृंहणानुध्यानव्यवसितसकलजगदभिप्राय आत्मयोनि
रखिलनिगमनिजगणपरिवेष्टितः॥ स्वभवनादवततार॥७॥ स तत्र तत्र गगनतल उडुपतिरिव वि
मानावलिभिरनुपथममरपरिवृढैरभिपूज्यमानः पथि पथि च वरूथशः सिद्धगंधर्वसाध्यचारणमु
निगणैरुपगीयमानो गंधमादनद्रोणीमवभासयन्नुपससर्प॥८॥॥

र्गस्य गुणसृष्टेः परिबृंहणं वृद्धिः तदनुचिंतने व्यवसितः॥ सकलजगतामभिप्रायो येन सः॥ यथा रा
ज्ञा चावेमंडलेश्वराणामभिप्रायो निश्चीयते तद्वत्॥ अखिलैर्निगमैर्मूर्तिमद्भिर्निजगणैश्च मरीच्यादिभिः
परिवृतः सत्यलोकादवतीर्णः॥७॥ स तत्र गगनतले उडुपतिरिव चंद्र इव काशमानो गंधरूप १२१९ ... मासः
यन्नुपससर्प इत्यन्वयः॥ अमरवरैरिंद्रादिभिः॥८॥॥ राम

४
२

मा२

हंसयानेनोपलक्षणेनेनं पितरमुपलभमानः ॥ आभिमुख्येनाभिगतं पश्यन् पितापुत्राभ्यां मनुप्रियव्रताभ्यां सह नारदः कृ
ताञ्जलिः सन् सहसा अभ्युत्थायार्हणेन पूजया सह सौ परमेष्ठिनमुपतस्थे ॥ प्रियव्रतं नदामेदरं ज्ञेयं नारद उपदिशति
मनुस्सुतं नेतुमागतोस्तीति ज्ञातवान् ॥ ९ ॥ हे भारत भगवानादिपुरुषो ब्रह्मा तं प्रियव्रतमिति होवाचेत्यन्वयः तेन नारदे
नोपनीतमर्हणं यस्य सः ॥ सूक्तवाक्येन यथोचितवाक्येन अतिशयेन उदिता वर्णिता गुणगणाः ॥ अवतारे सुजयाः
सर्वोत्कर्षाश्च यस्य १० प्रवृत्तिनिष्ठं मद्वाक्यं प्रतिकूलं मन्वानो असूयां करिष्यतीति शंकमानो नाहमेवं वदामि

तत्र ह वा एतं देवर्षिर्हंसयानेन पितरं भगवन्तं हिरण्यगर्भमुपलभमानः ॥ सहसोत्थायार्हणेन सह पिता
पुत्राभ्यामवहिताञ्जलिरुपतस्थे ॥ ९ ॥ भगवानपि भारत तदुपनीतार्हणः ॥ सूक्तवाकेनातितरामुदितगु
णगणावतारसुजयः ॥ १० ॥ प्रियव्रतमादिपुरुषः तं सदयहासावलोक इति होवाच ॥ श्रीभगवानुवा
च ॥ निबोध तातेदमृतं ब्रवीमि मासूयितुं देवमर्हस्यप्रमेयं ॥ वयं भवस्ते तत एष महर्षिर्वहाम सर्वे वि
वशा यस्य दिष्टं ॥ ११ ॥ न तस्य कश्चित्तपसा विद्यया वा न योगवीर्येण मनीषया वा ॥ नैवार्थधर्मैः परतः
स्वतो वा कृतं विहन्तुं तनुभृद्विभूयात् ॥ १२ ॥

किं त्वमनुखेन ह विरे वृत्वा माज्ञापयतीति वदन् प्रवृत्तिनिवृत्तिरहस्यमाह निबोधेति नवभिः ॥ ऋतं सत्यमप्रमे
यं देवं अस्तूयितुं दोषारोपेण द्रष्टुं नार्हसि ततः तात एष त्वत्कुरुः स्वयं महर्षिः ॥ दिष्टं आदिष्टं आज्ञां विवशा अस्व
तंत्राः ॥ सतो वहामः ॥ ११ ॥ विवशत्वे सेवाहेतुत्वं वर्णितं निति तस्य कृतं तन निर्मितं तनुभृत्जीवः तपआदिभिर्विहं
तुं अन्यथा कर्तुं न विभूयात् ॥ प्रभुर्न भवेत् ॥ मनीषया समाधिबुद्धिबलेन परतः बलवदाश्रयात् ॥ १२ ॥

ब्रह्मोवाच२

9

ननु गृहे वर्तमानस्य भोगासक्तं जायमानस्य कुतो निःसंगताभावो मोक्षो वा ॥ अतस्त्यागे न वनवास एव युक्तः तत्राह ॥ भयं संसारं स्यादेव प्रमत्तस्य अजितेन्द्रियस्य वनेष्वपि संसारभयात् हनु गृहे वा न्तरंगकृतो मीस्य यतः ॥ सह एव षट् सपत्नाः ॥ ननु प्राप्ते वा बुद्धीन्द्रियाणि वयस्य सत्तथाभूत एव वनेष्वपि यतन्त्रात्को बुद्धत्वेन जितेन्द्रियत्वात् ॥ आत्मारामस्य बंधरागादि दोषं किं करोति न करोत्येव ॥ १७ ॥ ननु गृहे वासादयः ॥ संभवति न तु वने इत्याशंक्याह य इति ॥ यो यः षट् वैरिणः ॥ मडिन्द्रियाणि विजिगीषमाणः संमूर्वं गृहेषु स्थित्वा ते धासमनं निरोधयन् ऊर्वं रजेत यतेत ॥ क्षीणेषु विषकामं गृ

भयं प्रमत्तस्य वनेष्वपि स्याद्यतः स आस्ते सह षट् सपत्नः ॥ जितेन्द्रियस्यात्मरतेर्बुधस्य गृहाश्रमः किं नु करोत्यवद्यम् ॥ १७ ॥ यः षट् सपत्नान् विजिगीषमाणो गृहेषु निर्विश्य यतेत पूर्वं ॥ अत्येति दुर्गाश्रित ऊर्जितारीन् क्षीणेषु कामं विचरेद्विपश्चित् ॥ १८ ॥ त्वं त्वब्जनाभांघ्रिसरोजकोशदुर्गाश्रितो निर्जितषट्सपत्नः ॥ भुंक्ष्वेह भोगान् पुरुषातिदिष्टान् विमुक्तसंगः प्रकृतिं भजस्व ॥ १९ ॥ श्रीशुक उवाच ॥ इति समभिहितो महाभागवतो भगवतस्त्रिभुवनगुरोरनुशासनमात्मनो लघुतयावनतशिरोधरो बाढमिति सबहुमानमुवाह ॥ २० ॥

हे सप्त वा विचरेत ॥ यतो लोके ऊर्जितारीन् दुर्गाश्रित एवात्येति जयति पश्चात् दुर्गं वा मत्त वा वर्तते न गृह्यते नेति पावेद्रहरेदिह स्यार्थः ॥ १८ ॥ इदं च गृहदुर्गाश्रयणं प्राकृतानां त्वं तु अब्जनाभस्य अंघ्रिसरोजकोश एव दुर्गं तदाश्रितः अत एव निर्जितषट्सपत्नः तथापि पुरुषेणेश्वरेणातिदिष्टान् दत्तान् ॥ भोगांस्तावत् भुंक्ष्व ॥ पश्चाद्विमुक्तसंगः सन् ॥ प्रकृतिं स्वरूपं भजस्व ॥ आत्मनिष्ठो भवेत्यर्थः ॥ १९ ॥ आत्मनः स्वतो लघुतया अल्पत्वेनाय यद्वा आत्मनो यदनुशासनं तत् ॥ अलघुतया गौरवेण बाढं तथा करिष्यामीति ॥ अवनतकंधरः सन् जग्राह ॥ २० ॥

श्री
भाग
टी
५

मनुना संतुष्टेन उपकल्पिता पूजा यस्य ॥ प्रियव्रतस्य योगभ्रंशात् नारदस्य च शिष्यनाशात् कुटिलमीत्वा तयोः संभवति तन्नता। स्तीत्याह ॥ अविषमं यथा तयोरभिसमीक्षमाणयोः सतोः आत्मनः समवस्थानं अवाङ्मनसं वाङ्मनसोरविषयं तद् येन निवासं प्रापतं तेषु वाङ्‌वाचा मनसा चैकं ... विद्यमानसा नदये विहये ॥ अतएवाव्यवहृतं व्यवहारशून्यं संप्रदानेन हृष्टं प्रवर्तयन् व्यवहाराद्वियसः सन्व्यवहारानतीतं स्वरूपं चिन्तयन्नसं नार्हितः इत्यर्थः ॥ २१ ॥ प्रसंगे राजेऽभिषिच्य वनं यास्यामीति

भगवानपि मनुना यथावदुपकल्पितापचितिः प्रियव्रतनारदयोरविषममभिसमीक्षमाणयोरात्मसमवस्थानमवाङ्मनसं क्षयमव्यवहृतं प्रवर्तयन्नगमत् ॥ २१ ॥ मनुरपि परेणैवं प्रतिसंधितमनोरथः सुरर्षिवरानुमतेनात्मजमखिलधरामण्डलस्थितिगुप्तय आस्थाप्य स्वयमतिविषमविषयविषजलाशयाशाया उपरराम ॥ २२ ॥ इति ह वाव स जगतीपतिरीश्वरेच्छयाधिनिवेशितकर्माधिकारोऽखिलजगद्बन्धध्वंसनपरानुभावस्य भगवत आदिपुरुषस्याङ्घ्रियुगलानवरतध्यानानुभावेन परिरन्धितकषायाशयोऽवदातोऽपि मानवर्धनो महतां महीतलमनुशशास ॥ २३ ॥

यो मनोरथः स परेणाब्रह्मणैव प्रतिसंधितः संपादितो यस्य सः नारदस्यानुमतेन स्थापयित्वा ॥ अतिविषमो दुस्तरो यो विषयविषजलाशयो गृहं तस्य आशाया आदिकर्षकृत्वा तेनासो विज्ञा वात स्याउपरतो बभूव ॥ २२ ॥ यान् सृष्टे सृष्टकर्म मरमत ॥ तत्रोक्तमन्तरं स्वयं संहरति इति ह वाव इत्यस्य सेवाहि ॥ अधिनिवेशितः प्रापितः कर्माधिकारो यस्य अखिलस्य जगतो बंधध्वंसनपरोऽनुभावो यस्य यदं घ्रियुगलं तस्यानवरतं ध्यानं तदनुभावेन परिरंधितक षायो दग्धरागादिमल आशयो यस्य अतोऽवदातः शुद्धोपि ब्रह्मादीनामाज्ञापालनेन मानवर्धनः ॥ २३ ॥

राम
५

उइति विस्मये ॥ हइति प्रसिद्धौ ॥ वावेति निश्चये ॥ २४ ॥ आत्मनः समानैः शीलादिभिः उदारा महान्तो दशपुत्रान् जनयामास
तानाह ॥ आग्नीध्र ॥ इध्मजिह्वः यज्ञबाहुः महावीरः हिरण्यरेताः घृतपृष्ठः सवनः मेधातिथिः ॥ वीतिहोत्रः ॥ कविश्चे
ति अग्निनामानि येषां ते ॥ २५ ॥ अर्भभावाद्बाल्यादारभ्य ॥ २६ ॥ तस्मिन्नाश्रमे गृहस्थाश्रमे ॥ श्रीमच्चरणारविंदयोरवि

अथ उवाह ह उद्दहितरं प्रजापतेर्विश्वकर्मण उपयेमे बर्हिष्मतीं नाम ॥ २३ ॥ तस्यामु ह वाव आत्मजानात्मसमा
नशीलगुणकर्मरूपवीर्योदारान् ॥ दश भावयांबभूव ॥ कन्यां च यवीयसीमूर्जस्वतीं नाम ॥ २४ ॥ आग्नी
ध्रेध्मजिह्वयज्ञबाहुमहावीरहिरण्यरेतोघृतपृष्ठसवनमेधातिथिवीतिहोत्रकवय इति सर्व एवाग्निना
मानः ॥ २५ ॥ एतेषां कविर्महावीरः सवन इति त्रय आसन्नूर्ध्वरेतसः ॥ त आत्मविद्यायामर्भभावादारभ्य
कृतपरिचयाः ॥ पारमहंस्यमेवाश्रममभजन् ॥ २६ ॥ तस्मिन्नु ह वा उपशमशीलाः परमर्षयः सकल
जीवनिकायावासस्य भगवतो वासुदेवस्य भीतानां शरणभूतस्य ॥ श्रीमच्चरणारविंदाविरतस्मर
णारविंदविगलितपरमभक्तियोगानुभावेन परिभावितान्तर्हृदयाधिगते भगवति सर्वेषां भूताना
मात्मभूते प्रत्यगात्मन्येवात्मनस्तादात्म्यमविशेषेण समीयुः ॥ २७ ॥ अन्यस्यामपि जायायां त्रयः पुत्रा
आसन्नुत्तमस्तामसो रैवत इति मन्वन्तराधिपतयः ॥ २८ ॥ ॥

रतस्मरणेनाविगलितः अखंडितो यः परमो भक्तियोगः ॥ तस्यानुभावेन विशोधितांतःकरणेष्वधिगतो यो भगवा
न्तस्मिन्नात्मतत्त्वे यदात्म्यं तस्य तादात्म्यमवि शेषेण विशेषो देहाद्युपाधिः तद्रहितेन प्रापुः ॥ २७ ॥ २८ ॥ ॥

उपशमायैव प्रसन्नदशाकोटिभिरेकमर्बुदं एतावता निवर्णाने कादशार्बुदानि जगतीं बुभुजे इत्यन्वयः ॥ राज्ञो धर्मपा
लन विषयभोगप्रभावे भेदि ॥ तत्रातायामेवैनं धर्मपालनमाह अव्याहता अखिलाः पुरुषकाराः पौरुषाणि यस्मात् ते
न स्मारणावलेन संभृतौ भूमौ दोर्दंडौ तयोर्युगलेन तापीडितः अकृष्टो मौर्वीगुणस्तस्य स्तनितं टंकारः तेनैव युद्धं विना वि
रमिता निरस्ता धर्मप्रतिपक्षा येन ॥ भोगातिशयमाह ॥ बर्हिष्मत्याः स्वभार्यायाः ॥ अनुदिनमेधमानैः प्रमोदादिभिः पर
भूयमानविवेकश्चैवं तत एव विषयासक्त्या आत्मानमनवबुध्यमान इव बुभुजे ॥ तत्र प्रमोदं पतिं दृष्ट्वा हर्षः ततः प्रसरू

एवमुपशमायनेषु स्वतनयेष्वथ जगतीपतिर्जगतीमर्बुदान्येकादश परिवत्सराणामव्याहताखिलपु
रुषकारसारसंभृतदोर्दंडयुगलापीडितमौर्वीगुणस्तनितविरमितधर्मप्रतिपक्षो बर्हिष्मत्याश्चानुदिन
मेधमानप्रमोदप्रसरणयौषिण्यव्रीडाप्रमुषितहासावलोकरुचिरक्ष्वेल्यादि[illegible]भिः पराभू
यमानविवेक इवानवबुध्यमान इव महामना बुभुजे ॥२८॥ यावदवभासयति सुरगिरिमनुपरिक्रमन्
भगवानादित्यो वसुधातलमर्धेनैव प्रतपत्यर्धेनावच्छादयति ॥ तदा हि भगवदुपासनोपचितातिपुरुष
प्रभावः तदनभिनंदन् समजवेन रथेन ज्योतिर्मयेन रजनीमपि दिनं करिष्यामीति सप्तकृत्वस्तरणिमनुपा
र्यक्रामत् द्वितीय इव पतंगः ॥२९॥ ॥

मभुस्यानादिलीला ॥ ततो योषिण्यं योषित्स्वभावकृतनम्रं गात्रानुभावप्रकाशनं ततो व्रीडया प्रमुषिताः हासा
वलोकाः ततो रुचिरक्ष्वेल्यादयः परिहासवाक्यादीनि तैः ॥२८॥ प्रभावातिशयमाह यावद्वसुधातले लोका
लोकपर्यंतमवभासयति मेरुं प्रदक्षिणीकुर्वन्नादित्यः ॥ तस्मिन्नर्धेनैवोपलक्षितं प्रतपति प्रकाशयति ॥ अर्धेनै
वावच्छादयति ॥ तमसाश्चाहणोमीति तदा द्वितीयः पतंगः सूर्य इव परिक्रामन्नपरिक्रामदिति ॥ नचैतदसंभावितं यत ॥
सो भगवदुपासनोपचितः ॥ अतिपुरुषानतिक्रान्तः प्रभावो यस्य ॥२९॥ ॥

14

येवैउहवप्रतिप्रसिद्धाः नंस्परस्य चक्रागुहूताःपरिखातःबातीःयतःयैरेवहूताःते ॥३०॥ तेषांपरिमाणंस्मृतिएवतिश्ले
षः पूर्वस्मात्पूर्वस्माद्द्विगुणोनविस्तारमानं ॥ उत्तरस्तनोद्विगुणोनविस्तारमानेनेमेवैसिंधुभ्योबहिः समंततउपक्लृप्ताः रचिताः ॥३१
यथासिंधुभ्योबहिरेकैकशोद्वीपाः एवंद्वीपानामपिबहिःसिंधवइत्याह ॥ क्षारोदेति ॥ दधिमंडोमथितंदधिए
तेसप्तजलधयः ॥ सप्तद्वीपानांपरिखाइवाभ्यंतरेतैः संवेष्टितायद्वीपाः ॥ तैः समानविस्तारतःबहिर्गीताः ३२

येवाउहतद्रथचरणनेमिकृतपरिखास्तेसप्तसिंधवआसन् ॥ यतएवकृताःसप्तभुवोद्वीपाः ३०
जंबूप्लक्षशाल्मलिकुशक्रौंचशाकपुष्करसंज्ञाः ॥ तेषांपरिमाणंपूर्वस्मात्पूर्वस्मादुत्तरउत्तरोयथा
संख्यंद्विगुणमानेनबहिःसमंततःउपक्लृप्ताः ॥ ३१ ॥ क्षारोदेक्षुरसोदसुरोदघृतोदक्षीरोददधिमंडोद
शुद्धोदाः ॥ सप्तजलधयःसप्तद्वीपपरितउपकल्पिताः ॥ तेषुजंबूद्वीपादिषुवर्हिष्मतीपतिरनुव्रतानात्मजा
नाग्नीध्रेध्मजिह्वयज्ञबाहुहिरण्यरेतोघृतपृष्ठमेधातिथिवीतिहोत्रसंज्ञान्यथासंख्येन ॥ एकैक
स्मिन्नेकमेवाधिपतिंविदधे ॥ ३२ ॥ दुहितरंचोर्जस्वतींनामोशनसेप्रायच्छद्यस्यामासीद्देवयानीनामका
व्यसुता ॥ ३३ ॥ नैवंविधःपुरुषकारउरुक्रमस्यपुंसांतदंघ्रिरजसाजितषड्गुणानां ॥ चित्रंविदूरवि
गतःसकृदाददीतयन्नामधेयमधुनासजहातिबंधं ॥ ३४ ॥

७४

कुअसंकीर्णतया ॥ ३२ ॥ अहोआश्चर्यंराज्ञःसामर्थ्यमितिपरीक्षिदभिप्रायज्ञोभगवान्बादरायणिराह ॥ नैवमि
ति ॥ जिताःषड्गुणाःइंद्रियाणिषड्वर्मयोवायैः तेषामेवंविधःपुरुषकारइतिनचित्रंनासंभावितं यतोविदूरविग
तः ॥ अंत्यजोपियस्योरुक्रमस्यनामसकृदुच्चारयेद्यः सअधुनातत्क्षणमेवबंधंसंसारंतन्नामितिपाठेप्ययमे
वार्थः ॥ पापंतरेतन्नचेडालत्वंजहातिविशुद्धोभवतीत्यर्थः ॥ ३५ ॥

15

॥ नएकैकंशेष्नयथासंख्येन सप्तस्वपिद्वीपेषु एकएव पतिः तउपसंस्थितः ४०

श्री: भाग टी: ८

तस्य पराक्रममुपसंहरन्निर्वेदनिष्क्रममाह स एवमिति देवर्षिचरणयोरनुशयनमनुपसत्तिः तदनुपतितो यो गुणविसर्गो राज्यादिप्रपंचः तत्संसर्गेण आत्मानमसि निर्वेदो यस्य ॥३४॥ तमाह मया असाध्वनुष्ठितं यदयं यतोभिनिवेशितः ततः अलमलं विषयैः विनोदमृगं मर्कटं ॥३५॥ परदेवतायाः हरेः प्रसादेनाधिगतः आत्मनः प्रत्यवमर्शो विवेकः तेनानुवृत्तस्य पदवीं तदुपदिष्टं मार्गमेव पुनरेवानुससारानुसृतवान् ॥ किं कृत्वा अनुगतेभ्यः इमां पृथ्वीं विभ

स एवमपरिमितबलपराक्रम एकदा तु देवर्षिचरणानुशयनानुपतितगुणविसर्गसंसर्गेणानिर्वृतमिवात्मानं मन्यमानः आत्मनिर्वेद इदमाह ॥३४॥ अहो असाध्वनुष्ठितं यदभिनिवेशितोहमिन्द्रियैरविद्यारचितविषमविषयान्धकूपे तदलमलममुष्या वनिताया विनोदमृगं मां धिग्धिगिति गर्हयांचकार ॥३५॥ परदेवताप्रसादाधिगतात्मप्रत्यवमर्शेनानुप्रवृत्तेभ्यः पुत्रेभ्य इमां यथादायं विभज्य भुक्तभोगां च महिषीं मृतकमिव सह महाविभूतिमपहाय स्वयं निहितनिर्वेदो हृदि गृहीतहरिविहारानुभावो भगवतो नारदस्य पदवीं पुनरेवानुससार ॥३६॥ तस्य ह वा एते श्लोकाः ॥ प्रियव्रतकृतं कर्म को नु कुर्याद्विनेश्वरं ॥ यो नेमिनिम्नैरकरोच्छायां घ्नन् सप्तवारिधीन् ॥३७॥ ॥राम

ज्य भुक्तभोगाय स्यात् तां ॥ महाविभूतिः साम्राज्यसंपत् तत्सहितां महिषीं मृतशरीरमिव परित्यज्य तत्र हेतुः हृदि निहितो निर्वेदो येन ॥ हृदि गृहीतो हरेरनुभावः यः हृदि गृहीतो निश्चितो हरिविहारस्तेनात्र भावस्याग सामर्थ्यं यस्य ॥३६॥ तस्य महिमोपवर्णने श्लोकाः पूर्वसिद्धाः कथ्यन्ते यस्या वेदे तदभ्युपगम्यं को भवतीति।
को वा मनुर्यात् का या विभुवत् सोपि न स्यात् ॥ ३७ ॥

16

८

भूसंस्थानं द्वीपेषु कृतं ॥ सरिद्गिरिवनादिभिः सीमाच येन कृता भूतानां निर्वृत्यै सुखाय युद्धविवादाय ॥ ३९ ॥ भौमं पातालसंज्ञं दिव्यं स्वर्गजं मानुषं मर्त्यलोकजं ॥ महित्वं वैभवं योगिवत् तत्संमेने ॥ पुरुषानुजनाः विष्णुभक्तास्तएव प्रियायस्येति ॥ ४० ॥ इतिश्रीभावार्थदीपिकायां पंचमस्कंधे प्रथमोध्यायः ॥ १ ॥ द्वितीये प्रोक्त आग्नीध्रचरितं स्तोत्रेण संमतं ॥ यत्नाद्धि पूर्वचित्तिं ॥

मूलं

भूसंस्थानं कृतं येन सरिद्गिरिवनादिभिः ॥ सीमा च भूतनिर्वृत्यै द्वीपे द्वीपे विभागशः ॥ ३९ ॥ भौमं दिव्यं मानुषं च महित्वं कर्मयोगजं ॥ यश्चक्रे निरयौपम्यं पुरुषानुजनप्रियः ॥ ४० ॥ इतिश्रीभागवते पंचमस्कंधे प्रथमोध्यायः ॥ १ ॥ श्रीशुक उवाच ॥ एवं पितरि संप्रवृत्ते तदनुशासने वर्तमान आग्नीध्रो जंबूद्वीपौकसः प्रजाः औरसवद्धर्मावेक्षमाणः पर्यगोपायत् ॥ १ ॥ स च कदाचित् पितृलोककामः सुरवरवनिताक्रीडाचलद्रोण्यां भगवंतं विश्वसृजां पतिमाभृतपरिचर्योपकरण आत्मैकाग्र्येण तपस्वी आराधयांबभूव ॥ २ ॥ तदुपलभ्य भगवानादिपुरुषः सदसि गायंतीं पूर्वचित्तिं नामाप्सरसमभियापयामास ॥ ३ ॥ ॥

स्रोयो नाभिमुख्यानजीजनत् ॥ अस्मिन्वंशे प्रसिद्धोयमाग्नीध्रः स्वैराधुंगवः विहृत्य सतांपरितोषाय चरितं सुविस्तरवीत ॥ १ ॥ जंबूद्वीपमोकोयासांताः प्रजाः पुत्रवत्पालयामास ॥ धर्मावेक्षमाणः धर्ममवेक्षमाणः सम्यक् ॥ १ ॥ पितृलोककामः पुत्रकामः सुरवराणां वनिताः तासामाक्रीडाचलो मंदरः तस्य द्रोण्यां आभृतानि संपादितानि परिचर्योपकरणानि पुष्पादीनि येन ॥ २ ॥ तदुपलभ्य ज्ञात्वा ब्रह्मा अभियापयामास प्रस्थापयामास ॥ ३ ॥ ॥

राम ॥ १९ ॥ राम ॥ १९ ॥ राम ॥

श्री भाष्ये ती. ८

सा च तदाश्रमोपवनमुपवनश्रामेस्म त्वयः रमणीयत्वमेवाह॥ विविधास्तनिविडास्तु येक्विपिनः॥ तेषां ये विटपाः॥ ते
षां निकराः तैः संश्लिष्टः पुरटलताः स्वर्णवल्ल्यः तासां तूफोः स्पलविहंगाम सूवादयः॥ तेषां मिथुनैः श्रोयमाना
भिः स्फूर्तिभिरुच्चार्यमाणैः षड्जादिस्वरैः प्रतिबोध्यमानाये मलिनऊरूटादयः॥ ते विविधे युष्या तयोपद्मजिता
नादिनश्रमलोञ्जलाशयाः तेषु कमलाः॥ तेषां माकारमुपवनं॥ ४॥ स्थूलतिले गमनेये पदविन्यासाः सैर्गतो वि
लासोयस्याः च कारस्य सा स्त्रैकवाक्यत्वाय रवणालतानिश्रानिं ऊर्वतोरुचिरस्य चरणाभरणास्य स्वनेरामीलि

सा च तदाश्रमोपवनमतिरमणीयं विविधविविडविटपिविटपनिकरसंश्लिष्टपुरटलतानूफस्पलविहं
गमिथुनैः श्रोयमानस्फूर्तिभिः॥ प्रतिबोध्यमानमलिनऊरूटकारंडवकलहंसादिभिर्विविधमुप
मूलितामलजलाशयकमलाकरमुपवनश्रामा॥ ४॥ तस्याः स्थूलतिलगमनपदविन्यासगतिविलासा
याश्चातुपदंरवणायमानस्फुरद्भूषणाभरणस्वनैरनुगतपाकगताएनं रेवकुमारः समाधियोगेनामी
लितनयनतलिनसुकूलसुबालमीषदिक्ष्यमयवह॥ ५॥ तामेवाविदूरे मधुकरीमिवसुमनसउप
जिघ्रन्तीं दिविजमनुजमनोनयनाल्हादकुवैर्गतिविहारविनयावलोकनसुस्वरावयवैर्मनसि
नृणां कुसुमायुधस्य विदधतीं विवरे॥ ६॥ ॥

ते नयने पवनलिनमुकुले नयोर्युगलमीषत्॥ विकचय्य किंचिदुन्मील्य च हृदर्शतामेव देवीमकरध्वज
स्य वशमुपनीतः सतजडवदितिह वक्ष्यमाणम्॥ दशश्लोकानुवाह॥ जात्या गुरुकरणं रवै वेदयतेनतद्गुणोका
वाघ्रि दिविजातादेवानामनुष्याणां च यानि मनांसि नेत्राणि च नयनानि वितनुमामालादकुयैर्यत्यादिभिर्नृणां मा
नसि कामस्य विवर्धनेप्रसादाविदयतो॥ गतिस्वविहारस्वरैरौ विनययुक्तोवलोकस्सुस्वरावयवैर्नराणां॥
चस्त्रवयवास्वनेत्रादयस्तेः॥ ७॥ ॥

18

८

निजमुखाद्विगलितममृतमिवस्वादुआसवमादकं वचनसहासभाषणं तस्मिन्नामोदो निःश्वाससंबंधः तेन मदांधा ये मधुकरनि
कराः तेरुपरोधआवरणं तेन भयाद्रुतः क्षिप्रोयः पदन्यासः तेन वल्गुस्पंदने किंचिच्चलने स्तनयोः कवरभारे रशनायां च य
स्याः तां तस्याःश्रुवलोकनेन विवृतावसरस्यादन्नावकाशस्य ॥६॥ कात्वं शैलशिरावक्सिन् किं च कीर्षसि॥ मुनिवर्य त्वादि
पु स्वेन संबोधनादिजाशास्त्रकरणार्थं हे मुनिवर्य तूनं भगवतः परदेवतास्य मायासि शुंवा बालत्वमाह॥ हे सुस्यु

निजमुखविगलितामृतासवसहासभाषणामोदमदांधमधुकरनिकरोपरोधोपरोधेन द्रुतपदविन्यासेन
वल्गुस्पंदनस्तनकलशकवरभाररशनांदेवीं॥ तदवलोकनेन विवृतावसरस्य भगवतो मकरध्वजस्य व
शमुपनीतो जडवदिति होवाच॥६॥ कात्वं चिकीर्षसि च किं मुनिवर्य शैले मायासि कापि भगवत्परदे
वतायाः विज्ये विभर्षि धनुषी सुहृदात्मनोर्थे किं वा मृगान्मृगयसे विपिने प्रमत्तान्॥७॥ बाणाविमौ भग
वतः शतपत्रपत्रौ शांतावपुंखरुचिरौ अतितिग्मदंतौ॥ कस्मै युयुंक्षसि वने विचरन्न विद्मः क्षेमाय नो जड
धियां तव विक्रमोस्तु॥८॥ ॥

त्वं खे विज्ये निर्गुणे धनुषी विभर्षि॥ किमात्मनोर्थे तवैताभ्यां किं कार्यमस्ति किं वा प्रमत्तान् अजितेंद्रियान्मृगान्
त्वानस्मादादीन्मृगयसे तान्॥ वशीकर्तुमिच्छसीत्यर्थः॥७॥ कटाक्षौ बाणत्वेनाह॥ बाणाविमौ शतपत्रे ने
त्रकमले ते एव पत्राणि पिच्छानि ययोः शांतौ विभ्रमेण मंथरौ पुंखाभ्यां विनापि रुचिरौ॥ पत्रनयाकसितनेत्रास्यांप
रभागस्य पुंखस्थानीयस्याभावात्॥ अतितिग्मौ तीक्ष्णाग्रदंतौ अग्रभागौ ययोः॥ तौ कस्मै प्रयोक्तुमिच्छसीति न
विद्मः॥ अतो भयादेतावत्प्रार्थयामहे॥ नवायं विक्रमोस्माकं क्षेमाय स्तु॥८॥ ॥

19

तदंगपरिमललोभेनागच्छतो भ्रमरानालक्ष्याह प्रिया इति॥ अजस्रं संततं युष्मच्छिखातो विलुलिता विगलिताः
सुमनसां समितो वृष्टीर्गलितानि॥ अतः सुमानि भजंतीत्यर्थः॥ ऋषयो वेदशाखा इवेति॥ ७॥ नूपुरस्वनमाकर्ण्य
हवाच मितिलभ्य तव चरणपंजरयोः नूपुरयोस्तित्तिरीणां अंतर्गतितत्तिराणां परं केवलं वाचं शृणवाम॥ कथंभूतामनू
पाम् ब्रह्मरूपां मुखरां॥ अतिशयकंदतान्तावधीतपरिधानं वल्कलं निर्वक्तालिनेन प्रकल्प्याह॥ कदंबवज्रस्य समस्तरू।
चिदीप्तिः॥ अंकविटंकविंबे नितंबसासंदरमंडले कललवा॥ या हानवे॥ अंगेति संबोधनं मेखलामालक्ष्याह॥ यस्या

प्रिया इमे भगवतः परितः पतंति गायंति सामसरहस्यमजस्रमीशं॥ युष्मच्छिखाविलुलिताः सुमनोभि
वृष्टीः सर्वे भजंत्यृषिगणा इव वेदशाखाः॥ ७॥ वाचं परं चरणपंजरतित्तिरीणां ब्रह्मन्नरूपमुखरां शृ
णवाम तुभ्यम्॥ लब्धा कदंबरुचिरंकविटंकविंबे यस्यामलातपरिधिः क्व च वल्कलं ते॥ ८॥ किं सं
भृतं रुचिरयोर्द्विज शृंगयोस्ते मध्ये कृशो वहसि यत्र दृशिः श्रिता मे॥ पंकोरुणः सुरभिरात्मविषाण ई
दृक् येनाश्रमं सुभग मे सुरभीकरोषि॥ ९॥

मलातपरिधिः वर्तते॥ वल्कलं नितंबकान्तिलेन प्रकल्प्य स्पष्टं वस्त्रेणाहुतं॥ क्व च ते वल्कलमिति॥ ८॥ स्तनावा
लक्ष्याह॥ स्तनयोः शृंगयोः स्पंदयमानयोः किं संभृतं किं संभरणमस्ति॥ मनोहरं किंचिद्दलीयेनावन्मजाना।
मि यतो मध्ये कृशोपि त्वं कष्टेन वहसि॥ यत्र च मे दृशिः दृष्टिः श्रिता संलग्ना स्तिमुरस्यदं दृश्यं न च्युटेन इति भा
वः॥ स्तनगतं कुंकुममालक्ष्याह॥ पंकोरुणः आत्मनस्तव विषाणयोः स्तनयोरीदृक् अनयसर्वकुंकाररमनसाह॥ येनपंके

लोकं स्थानं यत्र भोजनं तदस्मादृशाम हृदयं वयवौ विमर्शि मनसः तन्मयौ दोषकौ॥ आगंतवे इयं भूतलं तणोत्तनी
या॥ वक्रे च वहद् ऋतं विमर्शि किं नदाह॥ इत्तोमधु बालापः॥ बाणो विलासः ताभ्यां सहितास्तव या त्रयस्ता स्ततं आदिश
हा सस्मिन् तन् मौदि॥११॥ कावान तवलोके आत्मनो देहस्य वृत्तिः आहारः॥ अंगाहे मरवे॥ अदत्तात् च वर्णात् हविरिति
तत्त्वं वयीगयोवाति आगच्छति इति तां हुलाभिप्रायं॥ अहनात् वहिरंगमातीति याठे॥ ममता वज्रोजनाद्धहिर्भूते
वहन्ति भीती मर्यः॥ यत स्तव विष्णोः कलासि विस्मृता नाशीति॥ अत्र अत्र मो अभिचाकशीतीति श्रुतेः॥ विष्णोः क

लोकं प्रदर्शय सखे तव मतावकं मे यत्र मत्स्य कच्छपकुलस्तालय बावहृदं वै॥ आत्मद्वितयमनच्छ यतो विम
र्शि वहद्ऋतं सरसस्तरसस्वधा दिवक्रे॥१२॥ कावान् मनुतनि वेदनाद्ध विरंगवाति विष्णोः कलास्य निमि
षोन्मकरौ चकरौ॥ उद्विग्नमीनयुगलं द्विजपंक्तिशोचिरासन्नभृंगनिकरं सरवन्मुखं ते॥१३॥ यो॥
सौत्वया करसरोजहृतः पतंगो दित्सभ्रमनभ्रमत एजयते दिदृक्षे॥ शुक्लं नतेस्मरसिवक्र जटा
वहत्यक सोनिलोहरतिलपट एव नीवीम॥१४॥

ला॰ सीत्यत्र हेतुः॥ तव करौ ते विष्णोर्दिवानिमिषोन्मकरौ अनिमिषो वत्वनेत्रत्वेन निमेषवृत्त्यौ उल्लसंतौ मकरौ
तदाकारे कुंडलयोः॥ तौ किंच तव सरसं स्मरहृत सरइव तदेव हृदं॥ उद्विग्नं चंचलं मीनयुगलं मिवनेत्रद्वयं
यस्मिन्॥ द्विजाः दंताः तेषां पंक्त्याः शोचिः शोभा वसिन्॥ सर सिंतु द्विजा एव हंसाः॥ आसन्नो भृंगनिकर इव
केशस्तोमः॥ परिमललब्धभृंगसत्तो मावाय स्मिन्॥१३॥ पतंगः कंदुकः भ्रमतः॥ भ्रमयितुमसमे प्रदक्षिणीकर
जयते च चलतां नयति॥ वक्रकेशसमूहं सकबंधनं तस्मर सिन संभावयसि किं॥ कष्ट भूतो नीवीं हरति॥ पत॥

२१

श्री. भाग. टी. ५

उपलब्धं प्राप्तं मह्यं मम मित्र मया सह तपः चर्तुमर्हसि ॥ किंवा स वै भवभावनः संसृतिविस्तारको ब्रह्मा मे प्रसीदति त्वां भार्यं कल्पयतीत्यर्थः ॥१५॥ द्विजदेवेन ब्रह्मणा दत्तं दृक् मनश्च लग्नं सत् नापयाति ॥ हे चारुशृङ्गि यतस्ते चित्तं तत्र मां त्वदर्थं नेतुमर्हसि ॥ सचिव्यस्त्वत्सख्योऽपि शिवा अनुकूलाः सन्तः प्रतिसरन्तु अनुवर्ततां यद्वा ॥ एतावता

रूपं तपोधन तपश्चरतां तपोघ्नं ह्येतत्तु केन तपसा भवतोपलब्धं ॥ चर्तुं तपोऽर्हसि मया सह मित्र मह्यं किं वा प्रसीदति स वै भवभावनो मे ॥१५॥ न त्वां त्यजामि दयितं द्विजदेवदत्तं यस्मिन्मनो दृगपि नो न वियाति लग्नं ॥ मां चारुशृङ्ग्यर्हसि नेतुमनुव्रतं ते चित्तं यतः प्रतिसरंतु शिवाः सचिव्यः ॥१६॥ श्रीशुकः इति ललनानुनयातिविशारदो ग्राम्यवैदग्ध्यया परिभाषया तां विबुधवधूं विबुधमतिरधिसभाजयामास ॥१७॥ सा च ततस्तस्य वीरयूथपतेर्बुद्धिशीलरूपवयः श्रियोदार्येण पराक्षिप्तमनास्तेन सहायुतायुतपरिवत्सरोपलक्षणं कालं जंबूद्वीपपतिना भौमस्वर्गभोगान्बुभुजे ॥१८॥ तस्यामु ह वा आत्मजान्स राजवर आग्नीध्रो नाभिकिंपुरुषहरिवर्षेलावृतरम्यकहिरण्मयकुरुभद्राश्वकेतुमालसंज्ञान्नव पुत्रानजनयत् ॥१९॥ सा सूत्वाथ सुतान्नवानुवत्सरं गृह एवापहाय पूर्वचित्तिर्भूय एवाजं देवमुपतस्थे ॥२०॥

पुता ४

र्थं त्वं मेयाः सचिव्यः ॥ सख्यः शिवाः फेरवः शृगालाः ॥ ताः ॥ प्रतिसरं तन्निधीन ॥ यद्वा वनवासे सह चर्येहि विपिनेः शिवाः प्रतिसरं तत्प्रदक्षिणं वा कुर्वन्तु ॥१६॥ ग्राम्यं च वैदग्ध्यं यस्याः तया बुद्ध्यादीनां हेतुकं ॥ जंबूद्वीपपतिना आग्नीध्रेण सह ... ॥ सूत्वा ... उपतस्थे अभजत ॥२०॥

22

५

औत्पत्तिकेनैव स्वभावेन संहननं दृढांगत्वं ॥ २१ ॥ कामानामतृप्तः अधिमन्यमानः श्रुतिभिर्वेदोक्तैः कर्मभिः ॥ अवारुंधप्राप्तवान् यत्र पितरो मादयंते ॥ २२ ॥ इति एवंभूताः संज्ञा यासां ताः पत्नीर्नवोदवहन् ॥ २३ ॥ इति श्रीभावार्थे पंचमे द्वितीयः ॥ २ ॥ ॐ तृतीये चरितं नाभेः सप्रमंगलमीर्यते ॥ यज्ञेन यत्र प्रीतः सन् पुत्रोऽभूद्वृषभो हरिः ॥ नाभिराग्नीध्रसुतः ॥ अप्रजया मेरुदेव्या भा

आग्नीध्रसुतास्ते मातुरनुग्रहादौत्पत्तिकेनैव संहननबलोपेताः पित्रा विभक्ताः ॥ आत्मतुल्यनामानि यथाभागं जंबूद्वीपवर्षाणि बुभुजुः ॥ २१ ॥ आग्नीध्रो राजातृप्तः कामानामप्सरसमेवानुदिनमधिमन्यमानस्तस्याः सलोकतां श्रुतिभिरवारुंधे ॥ यत्र पितरो मादयंते ॥ २२ ॥ संपरेते पितरि नव भ्रातरो मेरुदुहितॄर्मेरुदेवीं प्रतिरूपामुग्रदंष्ट्रीं लतां रम्यां श्यामां नारीं भद्रां देववीतिमिति संज्ञा नवोदवहन् ॥ २३ ॥ इति श्रीभागवते पंचमस्कंधे द्वितीयोऽध्यायः ॥ २ ॥ श्रीशुक उवाच ॥ ॐ नाभिरपत्यकामोऽप्रजया मेरुदेव्या [illegible] भगवंतं यज्ञपुरुषमवहितात्मायजत ॥ १ ॥ तस्य ह वाव श्रद्धया विशुद्धभावेन यजतः प्रवर्ग्येषु कर्मसु द्रव्यदेशकालमंत्रर्त्विग्दक्षिणाविधानयोगोपपत्त्या दुरधिगमोऽपि भगवान् भागवतवात्सल्यतया सुप्रतीक आत्मानमपराजितं निजजनाभिप्रेतार्थविधित्सया गृहीतहृदयो हृदयंगमं मनोनयनानंदनावयवाभिराममाविश्च

र्यया सह ॥ १ ॥ प्रवर्ग्यसंज्ञकेषु कर्मसु क्रियमाणेषु द्रव्यादयः सप्त ये योगाः उपायाः तेषामुपपत्त्या संपत्त्या दुरधिगमोऽपि भागवतेषु कृपालुतया सुप्रतीकः शोभनावयवः सन्नात्मानमाविश्चकार अपराजितं नित्यं निजभक्तानामभिप्रेतार्थाः तेषां विधित्सया गृहीतमाकृष्टं हृदयं चित्तं यस्य हृदयंगमं सुखकरं यतो मनोनय‑
नानंदनावयवैरभिरामं सुंदरं ॥ २ ॥

तत्र२

प्रचरत्सु२

23

सस्तनमात्रमेवार्हतिनाधिकमित्याह ॥ सकलजननिकायस्य हृत्त्विनविरसनाशिवनमाः प्रवरास्त्रयेगुणाः तेषामेकदेशः तस्य कथनाद्दिनाधिकंनार्हतीति ॥ ६ ॥ वाक्षवसोःनोवरोपिनंभक्तानांसखोपायएवेमाऽः हेपव मयविजनेवन्नुरागेणविरचितायेशावलसंशाखायाङ्कदावनुवस्तनयःसलिलेनसिक्तकिसलयाश्रुसुद्पलवाःश्रि लेतिपाठे ॥ शिलङ्काशादिमंजरी ॥ एवमादिभिः संभूतयासपादितयापूजयापरितुष्यसि ॥ ७ ॥ अथेतिप्रकारां

सकलजननिकायहृत्त्विनविरसनश्रिवनसप्रवरगुणगणैकदेशकथनाद्दते ॥ ५
परिजनानुरागविरचितपावलंबाहूसलिलसिक्तकिसलयतलसिरूवोऽ
वैरपि संभूतयासपर्ययाकिलपरमपवित्रपुष्टासि ॥ ७ ॥ अपयानयापिनभवत
इज्जयोरुभावभायासश्रुचिनमर्थमिहोपलभामहे ॥ ८ ॥ आत्मनएवात्रसम
वनमंजुसाबोभूयमानाशेषगुणपार्श्वस्वरूपस्य किं[...]याशिवश्रीशासा
नानामेतदभिरायनमात्रेभवितुमर्हतीति ॥ ९ ॥ समायरामचेद्रायनमः ॥

तरेअमपायातअनयाइज्जयायागेनापिउरुभावयाअनेकांगसमरूपयापिभवतः ॥ समुचितमपेतितंप्रयो जनेनैवपश्यामः ॥ ८ ॥ अत्रहेतुः आत्मनः स्वतएवात्रसमवनेसर्वशोभंजमानानवोभूयमानाऽतिशायेनमा वंतोयेःप्रोषाःगुरुषार्थाःपुरुतेस्वरूपंयस्यपरमात्मेदस्य ॥ नचेवंसमपियागानर्थकामित्याह किंत्विति स कामानामस्माकमेवैतदुपपद्यतेनतवेत्यर्थः ॥ ९ ॥ ॥

श्री॰
भा॰पं॰
टी॰
॥

26

स्वोपयोगमेव प्रदर्शयंति ॥ नयथेति ॥ परमेश्वरोपि परमपुरुषप्रकर्षयुक्तया करुणयाउपकल्पयिष्यन् संपादयि
ष्यन् चकार नात्र कामितं च ना पचितः अनपचितः अज्ञात एव ब्रह्मज्ञानेपेतनात ॥ स्वयमेवोपलब्धितः इष्टोसि इतरवत्
साधितवत् ॥९॥ ययपि त्वं चरान् दानुमांचिभूतोसि तथापि हे ब्रह्मन् राजर्षे बर्हिषियज्ञे निजपुरुषाणां त्वत्कांक्षो मा
मस्माकमीक्षणानां विषयो भवान् यर्हि यदा आसीत् तदा स्वयमेव वरः कृतः ॥१०॥ दर्शनस्य दुर्लभता माह अप्रसंगेन

न यथा बालिशानां स्वयमात्मनः श्रेयः परमविदुषां परमपुरुषप्रकर्षकरुणया स्वमहिमानं चापवर्गा
ख्यमुपकल्पयिष्यन् स्वयं नापचित एवेतरवदिहोपलक्षितः ॥१०॥ अथायमेव वरो ह्यर्हत्तम यर्हि बर्हिषि
राजर्षे वरदर्षभो भवान् निजपुरुषेक्षणविषय आसीत् ॥११॥ असंगनिशितज्ञानानलविधूताशेषमला
नां भवत्स्वभावानामात्मारामाणां मुनीनामनवरतपरिगुणितगुणगण परममंगलायनगुणगणकथ
नोसि ॥१२॥ अथ कथंचित्स्खलनक्षुत्पतनजृंभणदुरवस्थानादिषु विवशानां नः स्मरणाय ज्वर मरण
दशायामपि सकलकश्मलनिरसनानि तव गुणकृतनामधेयानि वचनगोचराणि भवंतु ॥१३॥ ॥ ॥

वैराग्येण निशितं यज्ज्ञानं स एवानलः तेन विधुता अशेषमला येषां ॥ अतो भवत इव स्वभावो येषां ॥ तानेवा
ह ॥ आत्मारामाणाम् एवंभूतानां मुनीनामपि परममंगलायनगुणगणकथनमेव व्रतं दर्शनं यस्य ॥ अतस्ते व
नवरतं परिगुणिता अभ्यस्ता गुणगणा यस्य इति संबोधनं ॥१२॥ दर्शनेनैव कृतार्था अपि वरमेकं प्रार्थयंते
अथेति स्मरणाय विवशानां नामधेयानि संप्रकाशिनः ॥१३॥ ॥

राम
॥

अन्यत्र प्रार्थनीयमस्तीत्याहुः ॥ किं चेति ॥ आशिषामीश्वरं कामानां स्वर्गापवर्गयोरपीश्वरं त्वा त्वामुपधावति प्रजायामेव पुरुषार्थ इति प्रत्ययो यस्य ॥ अयं चोपमा फलीकरणं तुषकणादिकमाशासानो धनदमुपधावति ॥ १४ ॥ इदं च नातिचित्रमित्याहुः इह संसारे ते अपराजितया मायया अनवसितपदव्या अज्ञातदितमार्गया अपराजितः को वै न कोपि ॥ अनावृतमतिः कः अपि तु एवविषयरूपविषं तस्य रयात् वेगात् ॥ तेन अनावृता अनाच्छादिता प्रकृतिर्यस्य सः कः यश्च उपासितमहच्चरणः ॥ अतः त्वन्मायामोहि

किं चायं राजर्षिरपत्यकामः प्रजां भवादृशीमाशासान ईश्वरमाशिषां स्वर्गापवर्गयोरपि भवन्तमुपधावति प्रजायामर्थप्रत्ययो धनदमिवाधनः फलीकरणम् ॥ १४ ॥ को वा इह तेऽपराजितोऽपराजितया माययानवसितपदव्यानावृतमतिर्विषयविषरयानावृतप्रकृतिरनुपासितमहच्चरणः ॥ १५ ॥ यदु ह वाव तव पुनरदभ्रकर्तरिह समाहूतस्तत्रार्थधियां मन्दानां नस्तद्यद्देवहेलनं देवदेवार्हसि साम्येन सर्वान् प्रतिवोढुमविदुषाम् ॥ १६ ॥ इति निगदेनाभिष्टूयमानो भगवाननिमिषर्षभो वर्षधराभिवादिताभिवन्दितचरणः सदयमिदमाह ॥ १७ ॥ अहो बताहमृषयो भवद्भिरवितथगीर्भिर्वरमसुलभमभियाचितो यदमुष्यात्मजो मया सदृशो भूयादिति ॥ ममाहमेवाभिरूपः कैवल्यादथापि ब्रह्मवादो न मृषा भवितुमर्हति ॥ ममैव हि मुखं यद्द्विजदेवकुलम् ॥ १८ ॥ ॥

तस्यैवमाशंसायदतत्समर्थः ॥ १५ ॥ अदभ्रकर्तः हे बहुकार्यकारिन् ॥ अल्पीयसे कार्याय त्वं यस्मादिह समाहूतोसि तत्प्रजायामर्थधियां मन्दानां तेषां नो यद्देवहेलनं अवज्ञानं तत् ॥ सर्वानतितत्साम्येन हे देवा प्रतिवोढुमर्हसि ॥ १६ ॥ इति निगदेन गद्यात्मकस्तोत्रेण वर्षधरा भारतवर्षपतिर्नाभिः ॥ तेनाभिवादिता ये ऋत्विजः ॥ तैरभिवंदितौ चरणौ यस्य ॥ १७ ॥ असुलभत्वे हेतुः ॥ ममाहमेवाभिरूपः सदृशः ॥ कैवल्यात् ॥ अद्वितीयत्वात् ॥ द्विजेषु देवा ब्राह्मणाः ॥ तेषां कुलम् ॥ १८ ॥ ॥

श्रीभगवानुवाच

२१

म ३

आग्नीध्रीये नाभौ ॥ १९ ॥ पतिं नाभिं हे विष्णुदत्त तस्यावरोधायनेऽन्तःपुरे मेरुदेव्यां शुक्लया शुद्धसत्वमूर्त्यावततार ॥ केषांध
र्मान् ॥ वातरशनानां दिग्वाससां पाषंडिव्याहृत्यर्थमाह ॥ श्रमणानां तपस्विनां ॥ ऋषीणां ज्ञानिनां ऊर्ध्वमंथिनां नैष्ठिकब्र
ह्मचारिणां ॥ २० ॥ इति श्रीभावार्थे पंचमस्कंधे तृतीयोऽध्यायः ॥ ३ ॥ चतुर्थे त्रिभिः प्रोक्तमृषभस्येहितं महत् ॥ लोका
र्थं येन स तु कर्म नैष्कर्म्यं च निदर्शितम् ॥ १ ॥ ततः पुत्रस्य भरतस्य राज्यं समुपवर्णितम् ॥ यस्य राज्ये जनः सर्वः संतोषास्तत

तत आग्नीध्रीयेंऽशकलयावतरिष्याम्यात्मतुल्यमनुपलभमानाः ॥ १९ ॥ इति निशामयंत्या मेरुदेव्याः पति
मभिधायांतर्दधे भगवान् बर्हिषि तस्मिन्नेव विष्णुदत्त भगवान् परमर्षिभिः प्रसादितो नाभेः प्रियचिकी
र्षया तदवरोधायने मेरुदेव्यां धर्मान् दर्शयितुकामो वातरशनानां श्रमणानां ऋषीणामूर्ध्वमंथिनां शुक्ल
या तन्वावततार २० इति श्रीभागवते पंचमस्कंधे तृतीयोऽध्यायः ॥ ३ ॥ श्रीशुक उवाच ॥ अथ ह तमुत्पत्त्यैवाभि
व्यज्यमानभगवल्लक्षणं साम्योपशमवैराग्यैश्वर्यमहाविभूतिभिरनुदिनमेधमानानुभावं प्रकृतयः
प्रजा ब्राह्मणा देवताश्चावनितलसमवनायातितरां जगृधुः ॥ १ ॥ तस्य ह वा इत्थं वर्ष्मणा वरीयसा बृह
च्छ्लोकेन चौजसा बलेन श्रिया यशसा वीर्यशौर्याभ्यां च पिता ऋषभ इतीदं नाम चकार ॥ २ ॥ ॥

निर्वृतः ॥ २ ॥ अभिव्यज्यमानानि भगवल्लक्षणानि पादतलादिषु वज्रांकुशादीनि यस्य महाविभूतिः सर्वसंपत्तिः
साम्यादिभिः सह वर्धमानः प्रभावः प्रकृतयोऽमात्यादयः ॥ जगृधुः अभिकांक्षंति स्म ॥ १ ॥ वर्ष्मणा देहेन तस्य विशे
षणद्वयं वरीयसा श्रेष्ठतमेन ॥ बृहंतः श्लोकाः यशांसि कवीनां यस्मिन् तेन ओजस्तेजः वीर्यं प्रभावः शौर्यं उत्सा
हः एतैर्गुणैरतिश्रेष्ठत्वादृषभः श्रेष्ठ इति नाम चकार ॥ २ ॥ ॥

28

तस्य वर्षमंडले ॥ ३ ॥ अवरुत्य शापतेस्तरुद्धया गृहीतो नवलोकसमानधर्मा मनुष्याकारो येन तं ॥ श्रुतएवमाया स्वपुत्र इति
विलसितामतिर्यस्य ॥ ४ ॥ आपौरप्रकृति पौरान् प्रकृतीश्चाभिव्याप्य विदितो उदारो यायस्मिन्नूकथंभूतो नाभिः ॥ जनपदः जनाः पौ
रादयः पदं प्रमाणं यस्य सः ॥ आत्मजं धर्ममर्यादारक्षार्थमभिषिच्य ब्राह्मणानामनुमत्या नियाय विशालायां बदरिकाश्रमे

तस्य ह वा इत्थं वर्ष्मणा वरीयसा बृहच्छ्लोकेन चौजसा बलेन श्रिया यशसा वीर्यशौर्याभ्यां च पिता ऋषभ इतीदं नाम चकार ॥ तदवधार्य भगवानृषभदेवो योगेश्वरः ॥ गृहस्थानमयो वा माय
यास्ववर्षमजनाभं नाम्नाप्युवर्षति ॥ ३ ॥ नाभिस्तु यथाभिलषितं सुप्रजस्त्वमवरुध्यातिप्रमोदभरविह्वलो
गद्गदाक्षरया गिरा स्वैरं गृहीतनरलोकसधर्मं भगवंतं पुराणपुरुषं मायाविलसितमतिर्वत्स तातेति सानु
रागमुपलालयन्परां निर्वृतिमुपगतः ॥ ४ ॥ विदितानुरागमापौरप्रकृतिजनपदो राजा नाभिरात्मजं समय
सेतुरक्षायामभिषिच्य ब्राह्मणेषूपनिधाय सह मेरुदेव्या विशालायां प्रसन्ननिपुणेन तपसा समाधियो
गेन नरनारायणाख्यं भगवंतं वासुदेवमुपासीनः ॥ कालेन तन्महिमानमवाप ॥ ५ ॥ यस्य ह पांडवेय श्लोकावु
दाहरंति को नु तत्कर्म राजर्षेर्नाभेरन्वाचरेत्पुमान् ॥ अपत्यतामगाद्यस्य हरिः शुद्धेन कर्मणा ॥ ६ ॥ ब्र
ह्मण्योन्यः कुतो नाभेर्विप्रा मंगलपूजिताः ॥ यस्य बर्हिषि यज्ञेशं दर्शयामासुरोजसा ॥ ७ ॥ अथ ह भगवा
नृषभदेवः स्ववर्षं कर्मक्षेत्रमनुमन्यमानः प्रदर्शितगुरुकुलवासो लब्धवरैर्गुरुभिरनुज्ञातो गृहमे
धिनां धर्माननुशिक्षमाणो जयंत्यामिंद्रदत्तायामुभयलक्षणं कर्म समाम्नायाम्नातमभियुंजन् ॥ आत्म
जानामात्मसमानानां शतं जनयामास ॥ ८

प्रसन्नं परमहंसजनकं निपुणं च तीव्रं तेन उपासीनः सेवमानः कालेन तन्महिमानं जीवन्मुक्तिमवाप ॥ ५ ॥ नाभेः प्रसिद्धं क
र्म अनुवदंतं तेरकौ उ मानाचरेत्तत्न को पीत्यर्थः ॥ ६ ॥ मंगलैः दक्षिणाभिः पूजिताः सन्तः ओजसा मंत्रबलेन ॥ ७ ॥ अस्मै पा
ग्रहणाय प्रदर्शितो गुरुकुलवासो येन अनुशिक्षमाणः अनुशिक्षयन् ॥ उभयविधं प्रवृत्तिनिवृत्तिलक्षणं कर्म विधियुक्त

मभियुंजन् कुर्वन्नित्यर्थः ॥ जयंत्यां मघोना दत्तायां पूर्वजन्मकृत ॥ ८

श्री· भाग· टी· ३

तेभ्य इति तमनु कुशावर्तादयो नव पुत्रा नवतेः प्रधाना ज्येष्ठाः ॥ १० ॥ तदनंतरं कविप्रमुखा नव भागवतधर्मप्रदर्शकाः । वसुदेवनारदयोः संवादो यस्मिंस्तदुपरिष्टात् एकादशे ॥ ११ ॥ महाशालीना अतिविनीताः ॥ १२ ॥ केवलः शुद्धः विपरीतवत् अनीश्वरवत् कर्माणि कुर्वन् स्वयमयन् नियमितवान् ॥ [illegible] ॥ कर्मकरणे हेतुः अनुगतमुत्सन्नं स्वय[illegible]

येषां खलु महायोगी भरतो ज्येष्ठः श्रेष्ठगुण आसीत् ॥ येनेदं वर्षं भारतमिति व्यपदिशंति ॥ ९ ॥ तमनु कुशावर्त इलावर्तो ब्रह्मावर्तो मलयः केतुर्भद्रसेन इंद्रस्पृग्विदर्भः कीकट इति नव नवति प्रधानाः ॥ १० ॥ कविर्हविरंतरिक्षः प्रबुद्धः पिप्पलायनः ॥ आविर्होत्रोऽथ द्रुमिलश्चमसः करभाजनः ॥ इति भागवतधर्मदर्शना नव महाभागवतास्तेषां सुचरितं भगवन्महिमोपबृंहितं वसुदेवनारदसंवादमुपशमायनमुपरिष्टाद्वर्णयिष्यामः ॥ ११ ॥ यवीयांस एकाशीतिर्जायंतेयाः पितुरादेशकरा महाशालीना महाश्रोत्रिया यज्ञशीलाः कर्मविशुद्धा ब्राह्मणा बभूवुः ॥ १२ ॥ भगवानृषभसंज्ञ आत्मतंत्रः स्वयं नित्यनिवृत्तानर्थपरंपरः केवलानंदानुभव ईश्वर एव विपरीतवत्कर्माण्यारभमाणः कालेनानुगतं धर्ममाचरणेनोपशिक्षयन्नतद्विदां सम उपशांतो मैत्रः कारुणिको धर्मार्थयशः प्रजानंदामृतावरोधेन गृहेषु लोकं नियमयत् ॥ १३ ॥ यद्यच्छीर्षण्याचरितं तत्तदनुवर्तते लोकः ॥ १४ ॥ यद्यपि स्वविदितं सकलधर्मं ब्राह्मं गुह्यं ब्राह्मणैर्दर्शितमार्गेण सामादिभिरुपायैर्जनतामनुशशास ॥ १५ ॥ ॥

माचरणेन तद्विदामुपशिक्षयन् ॥ कथं धर्मादीनामवरोधेन संगृह्णानंदो भोगः अमृतं मोक्षः ३ शीर्षण्यः श्रेष्ठः तेनाचरितं तत् ॥ १४ ॥ सकलो धर्मो यस्मिन् तत् ब्राह्मं गुह्यं वेदरहस्यं यद्यपि स्वेनैव विदितं तथापि ब्राह्मणनामुद्दिष्टं करोतीत्यर्थः ॥ १५ ॥ ॥ ~ ३[illegible] ॥

३०

५४

३

द्रव्यादिभिरुपचितैर्यज्ञैरिष्टवान् तत्र द्वयोर्योर्वनं पुत्रैव यथाशक्तिद्वित्रिवचनात् विविधोद्देशाः नानादेवतोद्देशाः यथोपदेशं
यथाविधि॥१७॥ अत्र स्वात्मकाशादात्मनः कश्चिदपिकिमपिकथंचनापिनवांछति इत्याह उदयेरक्षमाणतः अविद्यमा
नंखपुष्पादिकमिवनवांछत्यात्मीयमवेक्षतेज्ञो भर्तरि ऋषभदेवे प्रतिदिनमुल्लसितस्नेहादेकविनानवा
छति॥१८॥ अवहितमात्मनः संयतचित्तानामपि प्रजानां शामनार्थमुपशिक्षयन्निति हेवदमाणानुपवाच॥१९॥ इति

द्रव्यदेशकालवयःश्रद्धर्त्विग्विविधोद्देशोपचितैः॥ सर्वैरपिक्रतुभिर्यथोपदेशंशतकृत्वइयाज १७
भगवतर्षभेणपरिरक्ष्यमाणएतस्मिन्वर्षेनकश्चनपुरुषोवांछत्यविद्यमानमिवात्मनोऽन्यस्मात्कथंच
नकिमपिकर्हिचिदवेक्षतेभर्तर्यनुसवनंविजृंभितस्नेहातिशयमंतरेण॥१८॥ सकदाचिदटमानो
भगवानृषभोब्रह्मावर्तगतोब्रह्मर्षिप्रवरसभायांप्रजानांनिशामयंतीनामात्मजानवहितात्मनः
प्रश्रयप्रणयभरसुयंत्रितानप्युपशिक्षयन्नितिहोवाच॥१९॥ इतिश्रीभागवतेपंचमस्कंधेचतुर्थो
ध्यायः ४ ऋषभउवाच नायंदेहोदेहभाजांनृलोकेकष्टान्कामानर्हतेविड्भुजांये तपोदि
व्यंपुत्रकायेनसत्वंशुध्येद्यस्माद्ब्रह्मसौख्यंत्वनंतं॥१॥

इतिश्रीभावार्थदीपिकायांपंचमस्कंधेचतुर्थोध्यायः॥४॥ पंचमेमोक्षधर्मोपदेशैः पुत्रानुशासनंऋषभस्यपा
रमहंस्यंचतत्सद्धंदुतितितिक्षया॥१॥ विड्भुजामपियेसंतितानर्हतिकष्टान्दुःखदान्कामान्विषयानर्हते नेतयारयो
ग्येमनुष्यदेहोनभवति॥ दिव्यंसुलक्षणंयेनतपसायस्मात्तस्मात्शुद्धात्मत्वादनंतंब्रह्मसुखंभवति॥२॥ ॥

31

श्री: भा॰पं॰ टी॰ ५

मोक्षबंधयोर्निदानमाह॥ महत्सेवामिति॥ तमः संसारस्तद्वारं योषितां ये संगिनस्ते॥ महतां लक्षणमाह सार्धेन महांत इति साधवः सदाचाराः॥ २॥ मयि ईशे कृतसौहृद एवार्थः पुरुषार्थो येषां ये वा स्वेनान्यनिरपेक्षास्तैः सेवा स्वलक्षणं दर्शयति देहं बिभर्तीति देहंभरा विषयवार्ता तैर्विनयसंतिमया येषु जनेषु जायादिषु च रातिमित्रयनेवा पाठांतरे जायादिषु देहेषु॥ यावदर्थाश्च यावदर्थमेवार्थो येषां ते मितमध्यमपदलोपी समासः देहनिर्वाहा

महत्सेवां द्वारमाहुर्विमुक्तेस्तमोद्वारं योषितां संगिसंगं॥ महांतस्ते समचित्ताः
प्रशांता विमन्यवः सुहृदः साधवो ये॥ २॥ ये वा मयीशे कृतसौहृदार्था जनेषु
देहंभरवार्तिकेषु॥ गृहेषु जायात्मजरातिमत्सु न प्रीतियुक्ता यावदर्था
श्च लोके॥ ३॥ नूनं प्रमत्तः कुरुते विकर्म यदिंद्रियप्रीतय आ
पृणोति न साधु मन्ये यत आत्मनोयमसन्नपि क्लेशद आस देहः॥ ४॥ पराभव
स्तावदबोधजातो यावन्न जिज्ञासत आत्मतत्त्वं॥ यावत्क्रियास्तावदिदं मनो
वै कर्मात्मकं येन शरीरबंधः॥ ५॥ ॥ ॐ नमो नारायणाय नमो नमः॥ ॥ राम

र्थिकस्पृहा स्पृहावान्यार्थाः॥ ३॥ कामात्मा ईतीति यदुक्तं तदुपपादयति नूनमिति यदिंद्रियप्रीतये आपृणोति व्याप्रियते तदा प्रमत्तः सन्॥ विकर्म पापं नूनं कुरुते॥ यतो विकर्मणः प्राचीनादयं क्लेशप्रदो देहो जातः तं सेवन्पुनः करणात् साधु न मन्ये॥ ४॥ देहादेर्न पृथक्त्वात् क्रियानियमनरूपज्ञानाभावात्॥ पराभवो देहादिना स्वतू पराभिभवः अज्ञानकृतस्तावद्भवति॥ तत्र हेतुः यावत् क्रियाः स्युः तावदिदं मनो हि कर्मस्वभावमेव स्यात् येन

उक्तमुपसंहरति ॥ एवं पूर्वकृतं कर्मकर्तृ लिंगं मनः कर्म प्रयुंक्ते पुनः कर्माणि करोतीति जीवस्तु तत्कर्मव्याप्तमर्थमा
ह ॥ अविद्ययात्मन्युपधीयमाने आच्छाद्यमाने सति एवं मनः कर्म कृत्वा कर्मवशं प्रयुंक्ते ॥ ६ ॥ न केवलं देहयोग
मात्रेणानर्थ इति तत्रैवाह ॥ यदा गुणानामिंद्रियाणां ईहां चेष्टां अयथा मिथ्या आत्मीयान भवतीति विपश्चित् विवेकी
सन्न पश्यति तु पश्यतीति यावत् ॥ अयथा आत्मीयत्वेन स्वार्थः ॥ तत्र तदा सहसा गतस्मृतिः स्वरूपस्मृतिशून्यः स
न्नज्ञो मूढः मैथुन्यं स्त्रीप्रधानं गृहं प्राप्य तापान् विंदति ॥ ७ ॥ ननु कथं पुंयोगं स्त्रिया मिथुनीभूय स्वमात्मन

एवं मनः कर्मवशं प्रयुंक्ते अविद्ययात्मन्युपधीयमाने ॥ प्रीतिर्न यावन्मयि वासुदेवे न मुच्यते देहयोगे
न तावत् ॥ ६ ॥ यदा न पश्यत्ययथा गुणेहां स्वार्थे प्रमत्तः सहसा विपश्चित् ॥ गतस्मृतिर्विंदति तत्र ता
पानासाद्य मैथुन्यमगारमज्ञः ॥ ७ ॥ पुंसः स्त्रिया मिथुनीभावमेतं तयोर्मिथो हृदयग्रंथिमाहुः ॥ अ
तो गृहक्षेत्रसुताप्तवित्तैर्जनस्य मोहोयमहं ममेति ॥ ८ ॥ यदा मनोहृदयग्रंथिरस्य कर्मानुबद्धो दृढ
आश्लथेत ॥ तदा जनः संपरिवर्तते स्मात् मुक्तः परं यात्यतिहाय हेतुम् ॥ ९ ॥ ॥

भवतः कुतः तापाः स्युः ॥ तत्राह ॥ पुंस इति प्रत्येकं तयोर्देहैको हृदयग्रंथिरस्त्येव ॥ एवं मिथः स्थूलमन्यं हृद
यग्रंथिं तु मैथुनं वदंति ॥ कुत इमं तत्राह अतः अस्मात् मिथुनीभावात् ॥ प्रत्येकं हृदयग्रंथिना वदेहेंद्रियमात्रे
अहं ममेति मोहः ॥ अस्मात्तु गृहादिभिर्विषयभूतैर्महान्मोहो भवेदित्यर्थः ॥ ८ ॥ कदा तर्हि तस्य निवृत्तिस्तत्राह य
दास्य जनस्य कर्मभिरनुबद्धो दृढो मनोरूपो हृदयग्रंथिः शिथिलो भवेत् ॥ तदास्मान्मिथुनीभावान्निवर्तते तत
स्सुहृत्महंकारं त्यक्त्वा मुक्तः सन् परं पदं याति ॥ ९ ॥ ॥ राम ॥

33

श्री० भा० टी०
१५

हेतुमतिहाये समुक्तं तत्र पंचविंशतिसाधनान्याह चतुर्भिः ॥ हंसे मयि गुरौ भक्तिः सेवा ॥ अनुवृत्तिस्तत्परता ॥ विगतात्मस्पृहया
सर्वत्र लोकांतरेऽपि विषयसनावमसमाद्रः खातुसंधानेन ईहानिवृत्त्या कामयक कर्मत्यागेन ॥१०॥ मदर्थैः कर्मभिः अहमेव देवो
येषां तैः संगात् हे पुत्राः देहगेहादिष्वात्मबुद्धेः अहं ममेति बुद्धेः ॥११॥ अध्यात्मयोगेन अध्यात्मशास्त्राभ्यासेन सम्य
क् सम्यक् इति सर्वत्र संबंधः असंप्रमादेन कर्तव्यस्वाध्यायविस्याबोधेन ॥१२॥ सर्वत्र मत्सद्भावो मद्भावना तत्र विचक्षणेन विमुक्ते

दि२

हंसे गुरौ मयि भक्त्यानुवृत्त्या वितृष्णया द्वंद्वतितिक्षया च ॥ सर्वत्र जंतोर्व्यसनावगत्या जिज्ञासया तपसेहानिवृत्त्या ॥१०॥ मत्कर्मभिर्मत्कथया च नित्यं मद्देवसंगाद्गुणकीर्तनान्मे ॥ निर्वैरसाम्योपशमेन पुत्रा जिहासया देहगेहात्मबुद्धेः ॥११॥ अध्यात्मयोगेन विविक्तसेवया प्राणेंद्रियात्माभिजयेन सध्यक् ॥ सच्छ्रद्धया ब्रह्मचर्येण शश्वदसंप्रमादेन यमेन वाचां ॥१२॥ सर्वत्र मद्भावविचक्षणेन ज्ञानेन विज्ञानविराजितेन योगेन धृत्युद्यमसत्त्वयुक्तो लिंगं व्यपोहेत्कुशलोऽहमाख्यम् ॥१३॥ कर्माशयं हृदयग्रंथिबंधमविद्ययासादितमप्रमत्तः ॥ अनेन योगेन यथोपदेशं सम्यग्व्यपोह्योपरमेत योगात् १४

नविज्ञानविराजितेन अनुभवपर्यंतेन ज्ञानेन योगेन समाधिना ॥ धृत्युद्यमसत्त्वयुक्तः धैर्यप्रयत्नविवेकैः
युक्तः सन् ॥ अहं इत्याख्या यस्य तं उपाधिं व्यपोहेत ॥ निरस्येत ॥१३॥ ततः साधनांतरमेदिस्याह ॥ कर्माण्याशेरतेय
स्मिन् योगेन उपायेन यद्यपि साधनोपरमः सिद्ध एव तथापि यावद्देहपातं तदभ्यासशंकावारणायाह ॥१४

राम राम राम राम

34

किं वा पुत्रान् पिता शिष्यान्वा गुरुः नृपः प्रजाः एवमनुशिष्यादित्यन्वयः ॥ मल्लोकं यः कामयते यद्वा मदनुग्रह एवार्थो यस्य ॥ विमन्युः शिष्यादितस्याकरणेऽपि कोपशून्यः ॥ अतज्ज्ञान् तत्त्वमविदुषः अन्यथा तु ते कर्मसु मूढान् ॥१५॥ न योजयेदित्येतदुपपादयति लोक इति त्रिभिः ॥ नष्टदृष्टिर्विवेकहीनः यद्यपि निकाममतिशयेन कामो यस्य ॥१६॥ तमीदृशं कुबुद्धिं दृष्ट्वा तत्रैव कः न प्रवर्तयेत् ॥ न कोऽपि उत्पथेन गच्छन्तमन्धं यथा तेनैव बाढमिति कः कुर्यात् ॥१७॥ समुपेतः संप्राप्तो मृत्युः संसारो येन तं ततो भक्तिमार्गोपदेशेन येन मोचयेत् ॥ गुर्वादिर्न भवतीत्यर्थः ॥ यद्वा यस्तं मोचयितुं न शक्नुयात् ॥ अतस्तत्स्वगुर्वादि

पुत्रांश्च शिष्यांश्च नृपो गुरुर्वा मल्लोककामो मदनुग्रहार्थः ॥ इत्थं विमन्युरनुशिष्यादतज्ज्ञान्न योजयेत्कर्मसु कर्ममूढान् ॥१५॥ लोकः स्वयं श्रेयसि नष्टदृष्टिर्योऽर्थान्समीहेत निकामकामः ॥ अन्योन्यवैरः सुखलेशहेतोरनन्तदुःखं च न वेद मूढः ॥१६॥ कस्तं स्वयं तदभिज्ञो विपश्चिदविद्यायामन्तरे वर्तमानम् ॥ दृष्ट्वा पुनस्तं सघृणः कुबुद्धिं प्रयोजयेदुत्पथगं यथान्धं ॥१७॥ गुरुर्न स स्यात्स्वजनो न स स्यात्पिता न स स्याज्जननी न सा स्यात् ॥ दैवं न तत्स्यान्न पतिश्च स स्यान्न मोचयेद्यः समुपेतमृत्युम् ॥१८॥ इदं शरीरं मम दुर्विभाव्यं सत्त्वं हि मे हृदयं यत्र धर्मः ॥ पृष्ठे कृतो मे यदधर्म आराद् अतो हि मामृषभं प्राहुरार्याः ॥१९॥ ॥ रामाय नमः ॥

तिर्विधेयः ॥ ततश्च पिता न स्यादिति पुत्रो मत्तो यत्नो न कार्य इत्यर्थः ॥ दैवं देवता न स्यादिति पूजा न ग्राह्येत्यर्थः एवमन्यदपि द्रष्टव्यं ॥१८॥ एवं मोक्षधर्ममुपदिश्य भ्रातृनुरूपेण लक्षणीयधर्मस्य इत्यादिनिवृत्तये तेषां ज्ञानकथनपूर्वकमाह इदं द्वाभ्यां ॥ इदं मम शरीरं दुर्विभाव्यमवितर्क्यमदिच्छाविलसितं ॥ न तु देहप्राकृतो मनुष्यादिरित्यर्थः मे हृदयं तत्सत्त्वं किं तद्धृदयं यत्र धर्मः ॥ ततः शुद्धं सत्त्वमित्यर्थः ॥ कुतः यस्मात् मया अधर्मो दूरादेव पृष्ठे कृतः तस्मात् ततः ॥ अत एव मामृषभं श्रेष्ठं प्राहुः ॥१९॥

भवंतस्तु हृदयेन शुद्धसत्त्वमयेन जाताः तस्मात्तमस्मान्तरं हित्वा महत्तं संस्मार्यं मोदं भजत स्म ॥ तत्र तत्स्मरणात ॥ त्वां च यं भज पुत्र त्वा
त्प्रजास्तु पालयामेति चेदत आह ॥ तदेव मे शुश्रूषणं प्रजानां च पालनं भरतानुवृत्त्यैव सर्वं कृतं स्यादिति भावः ॥ २० ॥ हृदा
दी ब्राह्मणास्तु मेव्या इत्याशयेन तेषां सर्वेभ्यः श्रैष्ठ्यमाह पंचभिः भूतेषु चेतनेषु वीरोहंतीति वीरुधः स्थावराः उत्तमाश्च
अतिशयेनोत्तमाः तेभ्योपि श्रेष्ठाः सरीसृपाः ॥ सर्पंतीति जंगमाः तेषु उत्तमाः इति सर्वत्राध्याहारः तेष्वपि सबोधा ज्ञानिनः तेभ्योपि स्थि
तिर्येषां पश्वादीनां ते कीटादिभ्यः ततः तेभ्यः पिशाचेभ्यः ततोपि विबुधानुगा ये भूतप्रेतादयः ततोपि गंधर्वाः ततः सिद्धाः ।

तस्माद्भवंतो हृदयेन जाताः सर्वे महीयांसममुं सनाभं ॥ अक्लिष्टबुद्ध्या भरतं भजध्वं शुश्रूषणं तद्भरणं प्र
जानां ॥ २० ॥ भूतेषु वीरुद्भ्य उदुत्तमा ये सरीसृपास्तेषु सबोधनिष्ठाः ॥ ततो मनुष्याः प्रमथास्ततोपि गंधर्वसि
द्धा विबुधानुगा ये ॥ २१ ॥ देवासुरेभ्यो मघवत्प्रधाना दक्षादयो ब्रह्मसुतास्तु तेषां ॥ भवः परः सोथ विरिं
चवीर्यः स मत्परोहं द्विजदेवदेवः ॥ २२ ॥ न ब्राह्मणैस्तुलये भूतमन्यत्पश्यामि विप्राः किमतः परं तु
यस्मिन्नृभिः प्रहुतं श्रद्धयाहमश्नामि कामं न तथाग्निहोत्रे ॥ २३ ॥

ततो ये विबुधानुगाः किन्नरादयः ॥ २१ ॥ तेभ्योसुराः देवास्तेभ्यः संधिरार्थः देवाश्च मघवत्प्रधानाः ॥ देवेभ्य इंद्रः
श्रेष्ठ इत्यर्थः ॥ ततोपि ब्रह्मसुता दक्षादयः तेषां मध्ये भवः परः श्रेष्ठः स भवः विरिंचो वीर्यं शक्तिः कारणं यस्य
सः विरिंचवीर्यः ॥ अत एव तत्र जनकत्वात् हिरिरंचः ॥ ततः पर इत्यर्थः ॥ स विरिंचो मत्परः ॥ अहं परो यस्य द्विजदेवा ब्रा
ह्मणा एव देवाः पूज्या यस्य सोहं ॥ २२ ॥ ब्राह्मणेभ्यः सदृशं भूतं तुलये सम न पश्यामि ॥ अतो ब्राह्मणात्परं तु भूतं किं पा
श्यामि न किंचित ॥ विप्रा इति संबोधनं ब्राह्मणा वो यं सम सेवा मा वादि किंतु तस्य मिमर्थः तत्र हेतुमाह

५ यस्मिन्नृभिः प्रहुतं श्रद्धयाहमश्नामि कामं न तथाग्निहोत्रे
महमश्नामि ॥ ॥

36

मेतत्कर्म्मेतिदाख्योयेनब्राह्मणेनइहलोकेधृतायुषवब्राह्मणेसत्वाहुयोप्युगताःसंतितनःपरंकिंयषणामीत्यत्वयः ॥ २५
निस्पृहत्वमाह ॥ मद्भक्तोप्रियेषांनकिंचिद्विस्मार्यनीयमस्तितेषांकिमवेणराज्यादिनाकिमुस्मात्नकिमपि ॥ २५ ॥ नदेवब्रा
ह्मणसंमानविधायेदानींसर्वभूतसम्मानंनविधत्ते ॥ हेसत्वाःसर्वाणिजंगमानिस्थावराणिचभूतानिमय्येवस्थानत

भूतानांनतुरुष्यन्तीमेपुराणीयेनेहसत्वंपरमंपवित्रं ॥ शमोदमःसत्यमनुग्रहस्त्वतपस्तितिक्षानुभवश्चय
त्र ॥ २५ ॥ मद्भक्तोप्यनंतात्परतःपरस्मात्स्वर्गापवर्गाधिपतेर्नकिंचित ॥ येषांकिमुस्यादितरेणतेषामकिंचि
नानांमयिभक्तिभाजां ॥ २५ ॥ सर्वाणिमद्धिष्ण्यतयाभवद्भिश्चराणिभूतानिसुताध्रुवाणि ॥ सं
भावितव्यानिपदेपदेवोविविक्तदृग्भिस्तदुहार्हणंमे ॥ २५ ॥ मनोवचोदृक्कर
णेहितस्यसाक्षात्कृतंमेपरिबर्हणंहि ॥ विनापुमान्येन
महाविमोहात्कृतांतपाशान्नविमोक्तुमीशे
त ॥ २७ ॥ ॥

यावोयुष्माभिःसंभजनीयानिपदेपदेक्षणेक्षणेविविक्तास्तामस्तरादिरहितादृष्टिर्येषांतैः ॥ तदेवमदर्हणं ॥ २६
सर्वकर्मणांईश्वरार्पणंविधत्ते ॥ मनोवचोदृष्टानमेतेषांकरणानामीहितस्यव्यापारस्यमेपरिबर्हणमाराधन
मेवसाक्षात्कृतफलंयेनपरिबर्हणेनविनाकालपाशाद्विमोक्तुंनरईशोनसमर्थोभवेत ॥ २७ ॥ ॥ राम ॥

श्री: भा. पं. टी. ५

स्वतएव सुशिक्षितानपि लोकानुशासनार्थमनुशास्य मुनीनां पारमहंस्य धर्मस्य पद्धतिं दर्शयन् भरतमभिषिच्य राज्ये ऋषभ मद्यपि जितानां मध्ये जडोद्देशो नाम यस्य सर्वभगवाननवत्सर्वं नीत प्रवव्राजेत्यन्वयः उर्वरितः अवशिष्टः शरीरमात्रं परिग्रहो यस्य ॥ २८ ॥ अभिभाष्यमाणोऽपि जनानां मध्ये जडादिवदवतिष्ठमानः तूष्णीं बभूव अवधूतस्य वेषो यस्य ॥ २९ ॥ तत्र पुरादिषु उपपथं मार्गे मार्गमनुसरन्ति अवनिचरापसदैर्दुर्जनैः तर्जनादिभिः ॥ परिभूयमानोऽपि तदविगणयन्नेवेकचर एककोऽप्यविवीपरिव्राजकत्वमयः ॥ तत्र पुरं पत्तनं ग्रामाः हट्टस्तत्र आकरः रत्नादिखानिः खेटः कृषीवलग्रामः वाटः पुष्पादिवा

श्रीशुकः ॥ एवमनुशास्यात्मजान्स्वयमनुशिक्षितानपि लोकानुशासनार्थं महानुभावः ॥ परमसुहृद्भगवानृषभापदेश उपशमशीलानामुपरतकर्मणां महामुनीनां भक्तिज्ञानवैराग्यलक्षणं पारमहंस्यधर्ममुपशिक्षमाणः स्वतनयशतज्येष्ठं परमभागवतं भगवज्जनपरायणं भरतं धरणिपालनायाभिषिच्य स्वयं भवन एवोर्वरितशरीरमात्रपरिग्रह उन्मत्त इव गगनपरिधानः प्रकीर्णकेशः ॥ आत्मन्यारोपिताहवनीयो ब्रह्मावर्तात्प्रवव्राज ॥ २८ ॥ जडान्धमूकबधिरपिशाचोन्मादकवदवधूतवेषोऽभिभाष्यमाणोऽपि जनानां गृहीतमौनव्रतः तूष्णीं बभूव ॥ २९ ॥ तत्र तत्र पुरग्रामाकरखेटवाटखर्वटशिबिरव्रजघोषसार्थगिरिवनाश्रमादिष्वनुपथमवनिचरापसदैः ॥ परिभूयमानो मक्षिकाभिरिव वनगजस्तर्जनताडनावमेहनष्ठीवनग्रावशकृद्रजः ॥ प्रक्षेपपूतिवातदुरुक्तैस्तदविगणयन्नेवासत्संस्थान एतस्मिन्देहोपलक्षणे सदपदेश उभयानुभवस्वरूपेण स्वमहिमावस्थानेनासमारोपिताहंममाभिमानत्वादविखण्डितमनाः

टिका: खर्वटं सेनावासस्थानं व्रजो गवां स्थानं घोषो गोपानां सार्थो यात्रिकजनसंघातः आश्रमा ऋषीणां तर्जनं भयजननं ताडनं प्रहारः मेहनं उपरि मूत्रोत्सर्गः ष्ठीवनं थूत्कृत्य ग्रावप्रक्षेपः ग्रामसा शकृतो रजसः प्रक्षेपः पूतिवातो योऽलानुदुरुक्तं शापः एतैर्गणने हेतुः मक्षिकाभिरिवेति तत्र हेतुः असति मिथ्याभूते संस्थाने सन्निवेशे देहे उपलक्षणं आकारो यस्य सदिति यदेशा मात्र यस्मिन् मिथ्याभिमानरहितो नेहं तु ताडनभयोः सदसतो इति

५४
सर्व२८४
ध२
प१

स वनतदा ग्रहगृहीत इवादृश्यत ॥ तत्र हेतुः पराक् अवलंबमानाश्च ते कुटिलाश्च ते जटिलाश्च कपिलाश्च केशाः
तेषां भूरिभारो यस्य सः अवधूतमनाहतं अत एव मलिनं निजशरीरं तेन कथंभूतोप्येवमदृश्यत ॥ अतिसुकुमा
राणि करचरणोरःस्थलानि तेषां विपुला बाह्वादयः त एवावयवाः तेषां विशिष्टो न्यासः संनिवेशो यस्य सः ॥ त
था प्रकृत्यैव सुंदरः स्वभावसिद्धो हासः तेन शोभनं सुमुखं यस्य ॥ नवानवनलिनदलवदाचरंतीति ये शिशिरता
रेताः प्रहारिकनीनिकेययोः अरुणो आयते नयने ताभ्यां रुचिरः तथा सदृशा अनुरूपा अधिकाः सुभगाः कपोलक

अतिसुकुमारकरचरणोरःस्थलविपुलबाह्वंसयुगलवदनाद्यवयवविन्यासः ॥ प्रकृतिसुंदरस्वभाव
हासस्सुमुखो नवनलिनदलायमानशिशिरतारारुणायतनयनरुचिरः ॥ सदृशसुभगकपोलक
र्णकंठनासो विगूढस्मितवदनमहोत्सवेन ॥ पुरवनितानां मनसि कुसुमशरासनमुपदधानः परा
गवलंबमानकुटिलजटिलकपिशकेशभूरिभारावधूतमलिननिजशरीरेण ग्रहगृहीत इवादृश्य
त ॥ ३१ ॥ यर्हि वाव स भगवान् लोकमिमं योगस्याद्धा प्रतीपमिवाचक्षाणस्तत्प्रतिक्रियाकर्म बीभ
त्सितमिति व्रतमाजगरमास्थितः शयान एवाश्नाति पिबति खादत्यवमेहति हदति स्म चेष्टमान उ
च्चरित आदिग्धोद्देशः ॥ ३२ ॥

र्णकंठनासिका यस्य तथा विगूढस्मितं यद्वदनं तस्य महोत्सवेन विभ्रमेण पुरांगनानां मनसि कामसंदीप
यन् एवंभूतोपि तथा ह्यदृश्यतेत्यन्वयः ॥ ३१ ॥ यर्हि यदा लोकं जनं योगस्य प्रतिपक्षमाचक्षाणः पश्यन्नवधूतव
तस्य प्रतिक्रियाकरणं च निंदितमिति मत्वा चक्षाणः ॥ तदा आजगरं व्रतमास्थितः सन् शयान एव अश्नाति स्म इत्यन्वयः
आजगरव्रतं नाम एकत्रैव स्थित्वा प्रारब्धकर्मोपभोगः अवमेहति मूत्रयति हदति पुरीषमुत्सृजति उच्चरिते पुरी

वेदे घ्रमनोविलवगतेवादिर्यमालिसाउदृ घापेड्रेघूरुघसः ॥ ३२ ॥

३९

वीभत्सभिया शंकाहतस्येति पुरीषस्य सुरभिणा गंधेन सौगंध्यं यस्य स वायुः ॥३३॥ एवं गवादिचर्यया पानादि करोति स्मेत्याह एवमिति ॥ काकमृगगवामिवाशनादि चरितं हृतिर्यस्य ॥३४॥ नानायोगचर्या आचरतीति तथा लोकसंग्रहाय विहाराय योगिनो विवेकपरिवर्तिनश्च मिति प्रदर्शनाय तत्त्वाकृतवान् वस्तुतस्तु भगवान् ॥ यतः अविरतः परमसुखानन्दानुभव एवानन्द ज्ञातत्वाणोनेनो कोऽयमानंदः तदनुभवस्वरूपः किंच ॥ वासुदेवे आत्मनो व्यवधाने

तस्य ह यः पुरीषसुरभिसौगंध्यवायुः तं देशं दशयोजनं समंतात्सुरभिं चकार ॥३३॥ एवं गोमृगकाकचर्यया व्रजंस्तिष्ठन्नासीनः शयानः काकगोमृगचरितः पिबति खादत्यवमेहति स्म ॥३४॥ इति नानायोगचर्याचरणो भगवान्कैवल्यपतिः ऋषभोऽविरतपरममहानंदानुभव आत्मनि सर्वेषां भूतानामात्मभूते भगवति वासुदेव आत्मनोऽव्यवधानानंतरोदरभावेन सिद्धसमस्तार्थपरिपूर्णो योगैश्वर्याणि वैहायसमनोजवांतर्धानपरकायप्रवेशदूरग्रहणादीनि यदृच्छयोपगतानि नांजसा नृप हृदयेनाभ्यनंदत ॥३५॥ इति श्रीभागवते पंचमस्कंधे ऋषभदेवानुचरिते पंचमोऽध्यायः ॥५॥

नत्वभेदेन ॥ नवियुतेस्य तेषामिव अनंतरामखोदरस्य देहोपाये भावः तेन नित्यविष्णुरूपाधित्वेनेत्यर्थः ॥ स्वतः एव सिद्धैः समस्तैरर्थैः फलैः परिपूर्णः तान्योगैश्वर्याणि नाभ्यनंदत् वैहायसं खेचरत्वं ॥ मनोजवत्वं मनसइव देहस्य वेगं दूरग्रहणं दूरदर्शनं हेतुपरस्त्वदयेन मनसा ॥३५॥ इति श्रीभावार्थदीपिकायां पंचमस्कंधे पंचमोऽध्यायः ॥५॥

स्वेच्छालीलाभिमानस्य देहस्यागक्रमाभिधा॥ प्रदहंतं दवाग्निं यः पश्यन्नपि न पश्यति॥ योगैश्वर्याणि नाभ्यनंदद्दिम्बकृंत
त्र सृष्टहुतिं नेति भावः हे भगवन्॥ योगेन समीरितस्य दीपितस्य ज्ञानेनैतेन स्वभर्जितानि दग्धानि कर्मबीजानि रागादी
नि यैः तेषां यदृच्छया प्राप्तानि योगैश्वर्याणि पुनः क्लेशदानि भवितुं नार्हंति॥ अतः किमिति नाभ्यनंदत ऋषभः॥ १॥ अणिमा
द्यैश्वर्य परिहरन्ति समस्तमिति॥ एके बुद्धिमंतोऽनवस्थानस्य चलस्य मनसो विश्वासं न समाचरंते न सम्यक्कुर्वंति॥ ज्ञाचः

राजोवाच॥ न नूनं भगव आत्मारामाणां योगसमीरितज्ञानावभर्जितकर्मबीजानामैश्वर्या
णि पुनः क्लेशदानि भवितुमर्हंति यदृच्छयोपगतानि॥ १॥ ऋषिरुवाच॥ सत्यमुक्तं किंत्विह
वा एके न मनसोऽद्धा विश्रंभमनवस्थानस्य शठकिरात इव संगच्छंते॥ २॥ तथा चोक्तं न कु
र्यात्कर्हिचित्सख्यं मनसि ह्यनवस्थिते॥ यद्विश्रंभाच्चिराच्चीर्णं चस्कंद तप ऐश्वरम्॥ ३

१३

किरातो यथा स्वते[?] पि मृगेषु प्राप्तेऽकिरातो यथा मृगा इति समसम्यतं वा॥ पाठांतरे शठो वंचकः॥ किरातो वणिक्
व्यवहर्तरि यथा विश्वस्तिन्वा व्यवहर्ता विश्वासं न याति इत्यर्थः॥ पादिको दोषो वर्जनीयः॥ इत्युपदेष्टुं नाभ्यनंदत इ
ति भावः॥ २॥ यद्विश्रंभात् यद्विश्वासात्॥ चिराच्चीर्णं बहुकालसंचितं तपः॥ चस्कंद स्रस्ताव॥ ऐश्वरं विश्वामैत्र
नीरूपदर्शनेन यदा ईश्वराणां समर्थानां मपि सौभरिप्रभृतीनां तपः॥ ३॥

राम राम॥

तत्र देवैः नियमितिकृतविघ्नाः सो यो योगी तदीयं मनः कामस्य तत्समर्थे यत्स्तेषां च छिद्रं अवकाशं ददाति॥ यथा कृतविश्वासा पुंश्चली जारान् अवकाशं ददाति तद्वत्पतिं घातयति तथा मनोऽपि कामादिभिर्योगिनं भ्रंशयतीत्यर्थः॥४॥ अरीन् कथयन् तन्मूलं परिहरति काम इति यन्मूलः यद्धेतुः कर्मबन्धो भवति तन्मनः को नु बुधः स्वीकुर्यात् तस्यार्थी न भवति तन्मयेत॥५॥ प्रासंगिकं समाप्य प्रस्तुतमाह॥ अथेति अखिलानां लोकपालानां ललामो मंडनभूतोऽपि डपरताबाधितानवृत्तिर्य

नियं ददाति कामस्य च्छिद्रं तन्मयेऽरयः॥ योगिनः कृतमैत्रस्य पत्युर्जायेव पुंश्चली॥४॥ कामो मन्युर्मदो लोभः शोकमोहभयादयः॥ कर्मबन्धश्च यन्मूलः स्वीकुर्यात्को नु तद्बुधः॥५॥ अथैवमखिललोकपालललामोऽपि विलक्षणैर्जडवदवधूतवेषभाषाचरितैरविलक्षितभगवत्प्रभावो योगिनां सांपरायविधिमनुशिक्षयन् स्वकलेवरं जिहासुरात्मन्यात्मानमसंव्यवहितमनर्थान्तरभावेनान्वीक्षमाण उपरतानुवृत्तिरुपरराम॥६॥ तस्य ह वा एवं मुक्तलिङ्गस्य भगवत ऋषभस्य योगमायावासनया देह इमां जगतीमभिमानाभासेन संक्रममाणः॥७॥ ॐ नमो नारायणाय नमश्चन्द्रायनमः॥

द्याम येनाशु वयं सुदुर्भिदां विधेहि योगं त्वयि नः स्वभावम् ॥१५॥ भारतेऽप्यस्मिन् वर्षे सरिच्छैला हि संति
बहवः मलयो मंगलप्रस्थो मैनाकः त्रिकूट ऋषभः ॥ कूटकः कोल्लकः सह्यो देवगिरिः ऋष्यमू
कः श्रीशैलो वेंकटो महेंद्रो वारिधारो विंध्यः शुक्तिमानृक्षगिरिः पारियात्रो द्रोणः चित्रकूटो गो
वर्धनो रैवतकः ककुभो नीलो गोकामुख इंद्रकीलः कामगिरिरिति चान्ये च शतशः सहस्रशः शैला
स्तेषां नितंबप्रभवा नदा नद्यश्च संत्यसंख्याताः एतासामपो भारत्यः प्रजा नामभिरेव पुनंतीनामात्मना
चोपस्पृशंति ॥१७॥ चंद्रवसा ताम्रपर्णी अवटोदा कृतमाला वैहायसी कावेरी वेणी पयस्विनी
शर्करावर्ता तुंगभद्रा कृष्णा वेण्या भीमरथी गोदावरी निर्विंध्या पयोष्णी तापी रेवा सुरसा नर्मदा च
र्मण्वती सिंधुरंध्रः शोणश्च नदौ महानदी वेदस्मृतिः ऋषिकुल्या त्रिसामा कौशिकी मंदाकिनी यमुना सरस्व
ती दृषद्वती गोमती सरयू रोधस्वती सप्तवती सुषोमा शतद्रुः चंद्रभागा मरुद्वृधा वितस्ता असि
क्नी विश्वेति महानद्यः ॥१८॥

भा॰ एवं सहजनानां तेनानुरूपं येन योगेन वयं त्वन्मायया नः कुकलेवरेऽर्पितामहंममतां तामाशु भिंद्याम तं योगं जनस्व सु
दुर्भिदामुपायांतरैः सर्वेषामप्यशक्याम् ॥१५॥ इलावृतवदस्मिन् वर्षे सरितः शैलाश्च संति ॥१६॥ नितंबप्रभ
वाः संभूताः नदा नद्यश्च प्रसिद्धाः ॥१७॥१८॥

श्री भाग टी ८१

लब्धं जन्म यैस्तैः पुरुषैः शुक्लादिभेदेन कर्मणा दिव्यादिगतय आत्मनो विधीयन्ते साध्यन्ते हि यस्मात्सर्वा
एव गतयः कर्मानुसारेण सर्वेषां भवन्ति यथावर्णविधानं मोक्षप्रकामः संन्यासवनस्थत्वादि तद्व
ति प्रकारेणास्मिन्नेव वर्षे नृणामपवर्गश्च भवति एतच्च कर्मादिबहुसाधनसंभवाभिप्रायेणोक्तं तत्रान्यत्रा
पवर्गाभावेन तदुपायोपि वादरायणः संभवादितिदेवानामपि मोक्षं सूचितवान् ॥ १९ ॥ अपवर्गस्वरूप
माह योऽसाविति आत्मनि भवा आत्म्या तद्रहिते अनिरुक्ते वाचामगोचरे अनिलयने अनाधारे।

हववर्षे

अस्मिन्नेव वर्षे पुरुषैर्लब्धजन्मभिः शुक्ललोहितकृष्णवर्णेन स्वारब्धेन कर्मणा दिव्यमानुष
नारकगतयो बह्व्यः ॥ आत्मन आनुपूर्व्येण सर्वा ह्येव सर्वेषां विधीयन्ते यथा वर्णविधानमपवर्गश्चापि भव
ति ॥ १९ ॥ योऽसौ भगवति सर्वभूतात्मन्यनात्म्ये ॥ अनिरुक्तेऽनिलयने परमात्मनि वासुदेवेऽनन्यनिमि
त्तभक्तियोगलक्षणो नानागतिनिमित्ताविद्याग्रन्थिरन्धनद्वारेण यदा हि महापुरुषपुरुषप्रसंगः
२० ॥ एतदेव हि देवा गायन्ति अहो अमीषां किमकारि शोभनं प्रसन्न एषां स्विदुत स्वयं हरिः ॥ यैर्जन्म
लब्धं नृषु भारताजिरे मुकुन्दसेवौपयिकं स्पृहा हि नः ॥ २१ ॥

अनन्यनिमित्तः ॥ अहेतुकः ॥ भक्तियोग एव लक्षणं
स्वरूपं भवति ॥ नानागतीनां निमित्तं योऽविद्याग्रन्थिः ॥ तस्य रन्धनं छेदनं तद्द्वारेण ॥ महापुरुषपुरुषाः वि
ष्णुभक्ताः तैः प्रकृष्टसंयोगो यदा तदा ॥ २० ॥ एतदेव मानुष्यं वर्षं सर्वपुरुषार्थसाधनं गायन्ति ॥ अमीषां
किं शोभनं कृतं स्वयमेव साधनं विनैव हरिरेषां प्रसन्नो भूत्वा एवंभूतं स्वपुण्यं स्वयं दत्तवान् कस्मात् ॥ भारता
जिरे भारतवर्षे ॥ केवलं स्पृहैव ॥ यन्मुकुन्दसेवोपयोगि नृषु जन्म तदेव लब्धं ॥ २१ ॥

७३

126

८१

जलोपस्पर्शनेन विधूतरजः तमस्त्वयेषां हंसादयो जातयः तासां हि स्थानीयाः विबुधोपमं संदर्शनं ज्ञानं सुरतादि
हितं रूपं प्रजननं मैथुनं यस्मात् ऽदनेच येषां ॥४॥ प्रत्नस्य पुरातनस्य पुरुषस्य विष्णोर्यद्रूपं तत्पसूर्यं महीमहि शरणं व्रजेम कथं
भूतं सत्यादीनामात्मानं अधिष्ठातारं तत्र सत्यमनुष्ठीयमानो धर्मः ऋतं प्रतीयमानो धर्मः अमृतानां तद्धेतुकस्य

मणिकूटो वज्रकूट इंद्रसेनो ज्योतिष्मान् सुपर्णो हिरण्यष्ठीवो मेघमाल इति सेतुशैलाः ॥ अरुणा नृ
म्णांगिरसी सावित्री सुप्रभाता ऋतंभरा सत्यंभरा इति महानद्यः ॥ यासां जलोपस्पर्शनविधूतरजस्तम
सो हंसपतंगोर्ध्वायनसत्यांगसंज्ञाश्चत्वारो वर्णाः सहस्रायुषो विबुधोपमसंदर्शनप्रजननाः ॥ स्वर्गद्वा
रं त्रय्या विद्यया भगवंतं त्रयीमयं सूर्यमात्मानं यजंते ॥४॥ प्रत्नस्य विष्णो रूपं यत्सत्यस्यर्तस्य ब्रह्मणः ॥ अ
मृतस्य च मृत्योश्च सूर्यमात्मानमीमहीति ॥ विधिना प्लक्षद्वीपमध्य आव्यायते ॥५॥ प्लक्षादिषु पंचसु पु
रुषाणामायुरिंद्रियमोजः सहो बलं बुद्धिर्विक्रम इति च सर्वेषामौत्पत्तिकी सिद्धिरविशेषेण वर्तते
॥६॥ प्लक्षः स्वसमानेनेक्षुरसोदेनावृतो यथा तथा द्वीपोऽपि शाल्मलो द्विगुणविशालः ॥ समानेन सु
रोदेनावृतः परिवृंक्ते ॥ यत्र ह वै शाल्मली प्लक्षायामा ॥७॥ यस्यां वाव किल निलयमाहुर्भगवतः
छंदःस्तुतः ॥ पतत्रिराजस्य सा द्वीपहूतये उपलक्ष्यते ॥८॥ तद्द्वीपाधिपतिः प्रियव्रतात्मजो यज्ञ
बाहुः स्वसुतेभ्यः सप्तभ्यः ॥ तन्नामानि सप्तवर्षाणि व्यभजत ॥ सुरोचनं सौमनस्यं रमणकं देव
वर्षं पारिभद्रमाप्यायनमविज्ञातमिति ॥९॥ श्रीरामः ॥

वेदस्य अमृतस्य शुभफलस्य मृत्योरशुभफलस्य छंदोभिः स्वावयवभूतैः श्रीविष्णोस्तोतीति छं
दःस्तुतः तस्य द्वीपस्य आह्वानाय व्यपदेशाय सुपर्णोपि प्लक्षत्वात् शाल्मलिसंज्ञितेति ॥८॥ ॥५॥ ॥

स्वगोभिः ॥ स्वरश्मिभिः ॥ २३ प्रथः प्रजेशो सोमो नो राजा आस्त्वित्याशिषमुद्दिश्य भवन्तं जुह्वत इत्यपाठे वृविवन्त्रयासं सम्भाव्यः
सावाष्पा ॥ सकोमलशिखा ॥ तेषां रोविषा ॥ २४ ॥ हे जातवेदः ॥ तेषां जातवेदसि अवलोकयेत् ॥ हव्यवाडुसि अ

कुं दं ॥

तेषु वर्षाद्रयो नद्यश्च सप्तैव विख्याताः स्वरसः शतशृंगो वामदेवः कुंदो मुकुंदः पुष्पवर्षः सहस्रश्रुतिरि
ति अनुमती सिनीवाली सरस्वती कुहू रजनी नंदा राकेति ॥ २१ ॥ तद्वर्षपुरुषाः श्रुतधरवीर्यधरवसुंधरेषंधरसंज्ञा भगवंतं वेदमयं सोममात्मानं वेदेन यजंते ॥ २२ ॥ स्वगोभिः पितृदेवेभ्यो विभजन् कृष्णशुक्लयोः प्रजानां सर्वासां राजांधः सोमो नः आस्त्विति ॥ २३ ॥ एवं सुरोदाद्बहिः तद्द्विगुणः समानेनावृतो घृतोदेन यथापूर्वः कुशद्वीपः यस्मिन् कुशस्तंबो देवकृतः तद्द्वीपाख्याकरो ज्वलन इवाप
रः स्वशष्परोचिषा दिशो विराजयति ॥ २४ ॥ तद्द्वीपपतिः प्रैयव्रतो राजन् हिरण्यरेता नाम स्वं द्वीपं सप्तभ्यः
स्वपुत्रेभ्यः ॥ यथाभागं विभज्य स्वयं तप आतिष्ठत ॥ वसुवसुदानदृढरुचिनाभिगुप्तस्तुत्यव्रत
विविक्तवामदेवनामभ्यः ॥ २५ ॥ तेषां वर्षेषु सीमागिरयो नद्यश्चाभिज्ञाताः सप्त सप्तैव चक्रः चतुःशृंगः क
पिलः चित्रकूटो देवानीक ऊर्ध्वरोमा द्रविण इति ॥ रसकुल्या मित्रविंदा श्रुतविंदा देवगर्भा घृतच्यु
ता मंत्रमालेति ॥ २६ ॥ यासां पयोभिः कुशद्वीपौकसः कुशलकोविदाभियुक्तकुलकसंज्ञा भगवंतं जा
तवेदसरूपिणं कर्मकौशलेन यजंति ॥ २७ ॥ परस्य ब्रह्मणः साक्षाज्जातवेदोऽसि हव्यवाट् देवानां य
ज्ञेन पुरुषं यजन इति ॥ २८ ॥

तो देवानां यतेन पुरुषं हविर्भिर्वयजन ॥ अंगानां नामादने मे भिनेसमर्पयस्वेति ॥ २८ ॥

मधुकुल्या ४
कुं ३
पुरुषांगानां २

उपक्लिमः वेष्टितः यथा कुशद्वीपो घृतोदेन वृतः ॥१८॥ गुहस्य कार्तिकेयस्य स्वयं भगवान् ज्ञानी आपो मयं प्रम
यं ॥२२॥ हे आपः पुरुषादीस्पुरात ॥ लवणसाम अर्णाः स्यभवत्या ॥ अतएव क्रौंचो कोपुनेस्य ॥ नाभवस्याः नः ॥ प्रस्मा

तथा वहिः क्रौंचद्वीपो द्विगुणः स्वमानेन क्षीरोदेन परित उपक्लृप्तो वृतो यथा कुशद्वीपो घृतोदेन यस्मि
न् क्रौंचो नाम पर्वतराजो द्वीपनामनिर्वर्तक आस्ते ॥१८॥ योसौ गुहप्रहरणोन्मथितनितंबकुंजोपि
क्षीरोदेनासिच्यमानो भगवता वरुणेनाभिगुप्तो विभयो बभूव ॥१९॥ तस्मिन्नपि प्रैयव्रतो घृतपृष्ठो नामा
धिपतिः स्वे द्वीपे सप्त वर्षाणि विभज्य तेषु पुत्रनामसु सप्त रिक्थादान् वर्षपान्निवेश्य स्वयं भगवान् भगवतः पर
मकल्याणयशस आत्मभूतस्य हरेश्चरणारविंदमुपजगाम ॥२०॥ आमो मधुरुहो मेघपृष्ठः सुधामा
भ्राजिष्ठो लोहितार्णो वनस्पतिरिति घृतपृष्ठसुताः तेषां वर्षगिरयः ॥ सप्त सप्तैव नद्यश्चाभिख्याताः
शुक्लो वर्धमानो भोजन उपबर्हणो नंदो नंदनः सर्वतोभद्र इति ॥२१॥ अभया अमृतौघा आर्यका
तीर्थवती रूपवती पवित्रवती शुक्लेति ॥ यासामंभः पवित्रममलमुपयुंजानाः पुरुषऋषभद्रविणदेव
कसंज्ञा वर्षपुरुषा आपोमयं देवमपां पूर्णेनांजलिना यजंते ॥२२॥ आपः पुरुषवीर्याः
स्थ पुनंतीर्भूर्भुवः सुवः ॥ ता नः पुनीतामीवघ्नीः स्पृशतामात्मना भुव इति ॥२३॥ एवं पुरस्तात्क्षीरोदात्
परित उपवेशितः शाकद्वीपो द्वात्रिंशल्लक्षयोजनायामः ॥ समानेन च दधिमंडोदेन परीतो यस्मिन्
दिशाको नाम महीरुहः स्वक्षेत्रव्यपदेशको यस्य ह महासुरभिगंधस्तं द्वीपमनुवासयति ॥२४॥

कंमत्स्य शातोभुवः शरीरानीतिपंनेव ॥२३॥ दध्नो मंडरमः स्पपवोदकं यस्यस ॥ ॥२४॥ श्रीरामाय नमो नमः

ब्रह्मरूपिणं कमलासनमूर्तिं सकेनेत्र ब्रह्मसालोक्यादिसाधकेन ॥३२॥ कर्ममयं कर्मफलरूपं ब्रह्मलिंगं प्रतियस्मात् एक
स्मिन्नेव परमेश्वरे अद्वैतं निष्ठा यस्य तत् अत एव शांतं नोद्वेगं ॥३३॥ ततः शुद्धोदात् परस्तात् लोकः सूर्यप्रकाशो लोकवान् देशः
अलोकस्तद्रहितः तयोरंतराले मध्ये तयोर्विभागार्थमित्यर्थः ॥३४॥ ततः पुष्करस्य दिग्मेरुतो दिव्यकियतांतरेणमपेक्षा
यां तदंतर्वर्तिनी भूमिमाह यावन्मानसोत्तरमेर्वंतरं सार्धमेकलक्षं तावत् सार्धकोटिपरिमिता तावती भूः शुद्धादामर

तद्वर्षपुरुषा भगवंतं ब्रह्मरूपिणं सकर्मकेण कर्मणाराधयंतीदं चोदाहरंति ॥३२॥ यत्तत्कर्ममयं लिंगं
ब्रह्मलिंगं जनोर्चयेत् ॥ एकांतमद्वयं शांतं तस्मै भगवते नमः ॥३३॥ ततः परस्ताल्लोकालोकनामाचलो लोका
लोकयोरंतराले परित उपक्षिप्तः ॥ यावन्मानसोत्तरमेर्वंतरं तावती भूमिः कांचन्यन्यादर्शतलोपमा ॥ यस्यां
प्रहितः पदार्थो न कथंचित्पुनः प्रत्युपलभ्यते तस्मात्सर्वसत्त्वपरिहृतासीत् ॥३४॥ लोकालोक इति समाख्या
यदनेनाचलेन लोकालोकस्यांतर्वर्तिनावस्थाप्यते ॥३५॥ स लोकत्रयांते परित ईश्वरेण विहितो यस्मा
त्सूर्यादीनां ध्रुवापवर्गाणां ज्योतिर्गणानां गभस्तयोर्वाचीनांस्त्रीन्लोकानावितन्वाना न कदाचित्पराची
ना भवितुमुत्सहंते तावदुन्नहनायामः ॥३६॥ एतावाल्लोकविन्यासो मानलक्षणसंस्थाभिर्विचिंतितः
कविभिः स तु पंचाशत्कोटिगणितस्य भूगोलस्य तुरीयभागोयं लोकालोकाचलः सार्द्धद्वादशकोटिरुन्न
तायामः ॥३७॥ ॥

तोस्ति तत्र च प्राणिनोपि संति ततः कांचनी भूमिरप्यस्तीत्यर्थः ॥ सा चैकोनचत्वारिंशल्लक्षोत्तरैककोटिपरिमि
ता ज्ञेया एवं हि सति मेरुलोकालोकयोरंतरं सार्द्धद्वादशकोटिपरिमितं वदंत्याणाकुपपर्यंतं भवति ॥ एतदेव विशे
षतंत्रेषूक्तं ॥ कोटिद्वयं चैकपंचाशल्लक्षाणि च ततः परं ॥ पंचाशच्च सहस्राणि सप्तद्वीपाः समानमाः ॥ ततो हेममयी
भूमिर्दशकोट्यो वरानने ॥ देवानां क्रीडनार्थाय लोकालोकस्ततः परं मितिः ॥ अत्र च दशकोटित्वं भूवेष्टितभूम्या
सहस्रं पृथ्वं ॥ सर्वसत्त्वपरिहृतेति देवव्यतिरेकेणास्ये देवानां क्रीडनार्थाय स्मृतान्वानि ॥३५॥ ॥

लोकत्रयस्यांते परितो मर्यादारूपो विहितः यस्मात् स्मृतिवेधको तत्सूर्यआदिर्येषां ध्रुवापवर्गाणां ज्योतिषां आवितन्वानाः स
मंतात् ॥ प्रकाशयंतः परितो गतेन ते शाक्येन तिनाव [illegible] तस्मात् तस्य तदन्तरूपमायामस्य त्रिलोकायस्य त्रुवाद त्रुद्धि
ततात ते त्रिलोकी मर्यादाभूत इत्यर्थः ॥ ३४ ॥ सो यं तत्र लोकालोकाचलः स्वस्य भागः ब्रह्म ऽथैषा स्वार्थवादा दशाको यो
मनो देकत इति इहद्वा ॥ ३८ ॥ आशा स्त्वादित्ये यो यिनिवेशिताः ते आसमंते ॥ ३५ ॥ न तस्य दिग्गजानां स्वविभूतीनां च विविधा
वीर्योपवृंहणाय सकल लोकस्वस्तये भगवान् तत्र महाविभूतिपतिः ॥ किंरूपं ज्ञानमनः स्वस्य यादृशं शुद्धं सत्त्वं तत्स्वयं

तत्त्व परिशिष्टाच्च तत्स्वाशास्त्वाम्नायो निनाखिलजगत्कल्याणाशिविशेषिताय स्वदपनयः ॥ ३७ ॥ ऋषभः पुष्करचू
डो वामनो पराजित इति सकललोकस्थितिहेतवः ॥ ३६ ॥ तेषां स्वविभूतीनां लोकपालानां विविधवीर्यो
पबृंहणाय भगवान्परममहापुरुषो महाविभूतिपतिः ॥ अंतर्याम्यात्मनो विशुद्धसत्त्वं धर्मज्ञानवैराग्यै
स्वयोगघृमहासिद्धुपलक्षणाद्विषक्सेनादिभिः ॥ स्वपार्षदप्रवरैः परिवारितो निजवरायुधोपशोभि
तैः भुजदंडैः संधारयमाणः तस्मिन्गिरिवरे समंतात्सकललोकस्वस्तय आस्ते ॥ ३८ ॥ आस्ते एवं
वेषं गतो भगवान्पुष आत्मयोगमायाविरचितविविधलोकयात्रागोपीथायेत्यर्थः ॥ ३९ ॥

वयमाणा आविष्कुर्वन्कीटं यायसंज्ञानादीन्महतो महासिद्धयः योपलक्षणां यस्य दोर्दंडैरुपलक्षितः सन्तत
महाविभूतिः परमैश्वर्यस्य पतित्वादेकवन्मूर्त्या समंतादास्ते ॥ ४० ॥ ननु नर्यामितया ततः स्थैव सर्वं कर्तृत्वा
किं तस्य बहिः समंताद्व स्थानेनेत्याशंक्याह तस्यास्यियमेव व्याचष्टे आत्मनो योगमायाविरचिताया विविधलो
कयात्रा तस्या गोपीथाय रक्षणाय एष भगवानेवं भूतमाकल्पं सर्वेषां गतः लीलया आस्त इति समंतादास्ते ३।

ह्यलोकपरिमाणं च मेरोरेकतः सार्धद्वादशकोट्यः तत्र लोकालोकाद्बहिरलोकात्परस्ताद्विशुद्धां किंच ज्ञानयनेफलायास
श्रीकृष्णेन प्रदर्शितं ॥४४॥ विस्तारेणाकाशब्रह्माण्डमानं सर्वतो विनिर्दिशयति ॥ अण्डमध्यगतः किं तन्मध्यं तदाह द्यावाभू-
म्योः पूर्वोक्तस्वकपालयोः ॥ यदन्तरं मध्यस्थानं सर्वतः पंचविंशतिकोट्यः स्युः ॥४५॥ अण्डमध्यावस्थाने कारणं तत्रा-

योऽन्ते विस्तार एतेन ह्यलोकपरिमाणं च व्याख्यातं ॥ यद्बहिर्लोकालोकाचलात् ततः परस्ता-
द्योगेश्वरगतिं विशुद्धामुदाहरन्ति ॥४४॥ अण्डमध्यगतः सूर्यो द्यावाभूम्योर्यदन्तरं ॥ सूर्याण्ड-
गोलयोर्मध्ये कोट्यः स्युः पंचविंशतिः ॥४५॥ मृतेऽण्ड एष एतस्मिन् यदभूत्ततो मार्तण्ड इति व्य-
पदेशः ॥ हिरण्यगर्भ इति यद्धिरण्याण्डसमुद्भवः ॥४६॥ सूर्येण हि विभज्यन्ते दिशः खं द्यौर्म-
ही भिदा ॥ स्वर्गापवर्गौ नरका रसौकांसि च सर्वशः ॥४७॥ देवतिर्यङ्मनुष्याणां
सरीसृपसवीरुधां ॥ सर्वजीवनिकायानां सूर्य आत्मा दृगीश्वरः ॥४
इति श्रीभागवते पंचमस्कंधे विंशोऽध्यायः ॥२०॥

म निर्वचनेनाह ॥ मृते अचेतने एष सूर्यो विराड्रूपेणाऽस्मात्प्रविष्टः ॥४६॥ किंच सूर्येणैव विभज्यन्ते दिशः
खं मन्तरिक्षं भिदा अस्यापि विभागः ॥ स्वर्गापवर्गौ भोगमोक्षपदे श्रीरसौकांसि अतलादीनि ॥४७॥ उपासनार्थ-
माह ॥ देवादीनां सूर्य आत्मा दृगीश्वरः नेत्राधिष्ठाता च ॥४८॥ इति श्रीभावार्थदीपिकायां पंचमस्कंधे विंशो-
ऽध्यायः ॥२०॥ ५ ॥ ॥ राम

श्री·
भाग·
टी·
५९

एवमध्यायविंशत्या भूमर्यादा निरूपिताः॥ अतः परं ग्रहमर्यादया पालनं त्रिभिरुच्यते॥ एकविंशे रवेः कालचक्रेण भ्रमतो
वर्ण्यते स्वगत्या राशिसंचारैः लोकयात्रा निरूप्यते॥ एतावानित्यस्तोरणाकोद्रुः पंचाशत्कोटियोजनपंचविंशतिः द्विदल
योरप्यैक्यं एकस्य मानेनापरस्य मानमनुमेयमिति दृष्टांतेन द्वत॥ ते अंतरेणांतरिक्षं तदुभयसंधितं नाभाक्रमयतः संल
ग्नं। उदगयनादिसंज्ञाभिर्मंदादिसमगतिभिः॥ व्याख्याकाले मारोहणादिस्थानेषु आरोहणाद्यभिपद्यमानो मकरा

श्रीशुकः॥ ॐ एतावानेव भूवलयस्य सन्निवेशः प्रमाणलक्षणतो व्याख्यातः॥ एतेन हि दिवो मंडलमानं त
द्विद उपदिशंति॥ यथा द्विदलयोर्निष्पावादीनां ते अंतरेणांतरिक्षं तदुभयसंधितं॥१॥ यन्मध्यगतो भगवां
स्तपतां पतिस्तपन आतपेन त्रिलोकीं प्रतपत्यवभासयत्यात्मभासा॥२॥ स एष उदगयनदक्षिणायनवैषु
वतसंज्ञाभिर्मांद्यशैघ्र्यसमानाभिर्गतिभिरारोहणावरोहणसमानस्थानेषु यथासवनमभिपद्यमा
नो मकरादिषु राशिष्वहोरात्राणि दीर्घह्रस्वसमानानि विधत्ते॥३॥ यदा मेषतुलयोर्व
र्तते तदहोरात्राणि समानानि भवंति॥ यदा वृषभादिषु पंचसु च राशिषु चरति तदाहान्येव वर्धंते॥ ह्रसति च मासि
मासि एकैका घटिका रात्रिषु॥ यदा वृश्चिकादिषु पंचसु वर्तते तदाहोरात्राणि विपर्ययाणि भवंति॥४

दिक्ष्वहोरात्राणि दीर्घह्रस्वसमानानि विधत्ते॥३॥ तत्स्वरूपं चयति यदेति ग्रसंतवैषम्यस्याभावात्॥ समानीत्युक्तं
सर्वथा साम्यं त्वेकस्याहोरात्रस्य पूर्वापि वृषभमिथुनयो रेवावृद्धिः कर्कटादिषु ह्रासः तथापि रात्र्यपेक्षया
आधिक्यं त्वादर्धेतिरस्तं॥ एवं रात्रिहृद्धावपि दिनापेक्षया ह्रसतीत्युक्तं॥ एकैकेति स्थूलदृष्ट्योक्तं द्विह्रासयोः
प्रतिमासं वैषम्यात्॥ विपर्ययाणीति अहानि न्यूनानि रात्रयोऽधिका इत्यर्थः॥५॥ ॥

नार

तरिशु

५९

136

नहृ हिङ्क्रमकालमाहुर्यावदिति ॥ ६ ॥ एवमंशाहिवातिसिंशन्नवकोटय इति मेरोरुभयतो मानसोत्तरस्यां तविस्तारेणापंच
दशलक्षाधिककोटित्रयपरिमिते ने द्विपरिमंडले मानसोत्तरे ॥ एवं वदशभिश्चादिकाभिरिमा दिक्षपि त्रैराशिक गणि
तेन तत्र मानसोत्तरे ये ॥ अत्रोपदितो विशेषः पुराणाने वादववांतव्यः ॥ तत्रापि ग्रहादिस्थानानितायपुराणादर्शितानि स
र्वग्रहाणां वीतोपवस्थानानि द्विजसत्तमाः ॥ स्थानं जरद्गवं मध्ये तथैरावतमुत्तरं ॥ वैश्वानरं दक्षिणतो निर्दिष्टमिहतत्व
न इति ॥ तदेवमध्यमोत्तरदक्षिणमार्गत्रयेषु मेरुवीथीचेत्याद्यभिधीयते ॥ त्रिभिस्त्रिभिस्त्वश्विन्यादि नक्षत्रैः नागवीथ्यै
गजवीथ्यैरावती चेत्युत्तरमार्गे वीथीत्रयमार्षभी गोवीथी जरद्गवी चेति मध्यमार्गे वीथीत्रयं ॥ अजवी

यावद्दक्षिणायनमहानि वर्द्धन्ते यावदुदगयनं रात्रयः ॥ ६ ॥ एवं नवकोटय एकपंचाशल्लक्षाणि योजनानां
मानसोत्तरगिरिपरिवर्तनस्योपदिशति ॥ ७ ॥ तस्मिन्नैन्द्री पुरी पूर्वस्मान्मेरोर्देवधानी नाम दक्षिणतो याम्यां सं
यमनी नाम पश्चाद्वारुणी निम्लोचनी नाम उत्तरतः सौम्यां विभावरी नाम तासूदयमध्याह्नास्तमयनि
शीथानीति भूतानां प्रवृत्तिनिवृत्तिनिमित्तानि समयविशेषेण मेरोश्चतुर्दिशं ॥ ८ ॥ ॥ ॥ ॥ ॥

थी वैश्वानरी चेति दक्षिणमार्गे वीथीत्रयं ॥ तदुक्तं तत्रैव अश्विनी कृत्तिका याम्या नागवीथीति शब्दिता रोहि
ण्यार्द्रा मृगशिरा गजवीथ्यभिधीयते ॥ पुष्याश्लेषा तथादित्या वीथी चैरावती स्मृता ॥ एतास्तु वीथयस्तिस्र उत्तरो मा
र्ग उच्यते ॥ तथा द्वे चापि फल्गुन्यौ मघा चैवार्षभी मता ॥ हस्तश्चित्रा तथा स्वाति गोवीथीति तु शब्दिता ॥ ज्येष्ठा विशा
खानुराधा वीथी जारद्गवी मता ॥ एतास्तु वीथयस्तिस्रो मध्यमो मार्ग उच्यते ॥ मूलाषाढोत्तराषाढा अजवीथ्यभि
शब्दिता ॥ श्रवणं च धनिष्ठा च मार्गी शततिभिषक्तया ॥ वैश्वानरी भाद्रपदे रेवती चैव कीर्तिता ॥ एतास्तु वीथयस्ति
स्रो दक्षिणो मार्ग उच्यत इति ॥ याम्या भरणी आदित्या अदितिदेवताका पुनर्वसुः ॥ मार्गी मृगवीथी ॥ ८ ॥ ॥

त्रिमितानि

137

तत्र कालनियमेन कर्मणां विपाकैः सनुष्यस्य निमित्तभूतं मासमानं विभज्य विनिर्दिश्यमानः वितर्कमासो यथोपनतो
यथा कर्मभोगाज्ञत्तु गुणानन्तो नामासाते ईन ॥२॥ वर्णाश्रमाचारानुवर्तिनः पुरुषास्य यात्रास्ताते कर्मभिर्दिष्टा दिष्टुपथे
नविनाने सुध्यानादिभिन्नं नर्धामिनु पयुज्यते ॥३॥ सप्तदशमासमासास्त्रिदिव्यवहारकारणा मिताः ॥ तपस्तोकान्तामाघा
वसुतिर्येतंतरं तेरणाम ध्ये यत्र भोवल घमन्ति संततस्य मध्ये यत्कालचक्रं नटु ततः ॥४॥ राशिभिर्मेषादिभिः संत्रता चोवाचे ज्ञादि
संज्ञोस चांद्रमासामांमासमाहः ॥ पक्षद्वयं समस्तं इति चांद्रेण मानेन सपादं महा नतत्र द्वयं सौरेण दिवानक्तं च प्रदेश ॥

सएष भगवानादिपुरुषः सर्ववस्तुसत्ताज्ञाता समो लोकानंभवतस्य ज्ञात्मानं त्रयीमयं कर्मविशुद्धिनिमित्तं कवि
भिरपि च वेदे विनिर्दिश्यमानो द्वादशधा विभज्य षड्ऋतुवसंतादि पुरुषानु यथोपजोषमृतुगुणान् विद
धाति ॥ २ ॥ तमेनमिह पुरुषास्त्रय्या विद्यया वर्णाश्रमाचारानुपथा उच्चावचैः कर्मभिराम्नातैर्योगवितानैश्च श्र
द्धया यजंतो नुसा श्रेयः समधिगच्छंति ॥३॥ अथ स एष आत्मा लोकानां द्यावापृथिव्योरन्तरेण नभोवलयस्य
कालचक्रगतो द्वादश मासान् भुंक्ते ॥४॥ राशिसंज्ञान् संवत्सरावयवान् मासः पक्षद्वयं दिवा नक्तं चेति सपादर्क्ष
द्वयमुपदिशंति यावता षष्ठमंशं भुंजीत स वै ऋतुरित्युपदिश्यते संवत्सरावयवः ॥ यावतार्धेन नभोवीथ्यां
प्रचरति तं कालमयनमाचक्षते अथ यावन्नभोमण्डलं सह द्यावापृथिव्योर्मण्डलाभ्यां कार्त्स्न्येन स ह भुंजीत
तं कालं संवत्सरं परिवत्सरमिडावत्सरमनुवत्सरं वत्सरमिति भानोर्मांद्यशैघ्र्यसमगतिभिः समामनंति ॥ १

५३

त्रमिति पित्रे एष षष्ठमंशं राशिराशि भुंक्ते ॥५॥६॥ मेरुणाभ्यां सह भुंजीत स हरिः सूर्यः ॥ यदा तु लग्नप्रतिपदि संक्रांतिर्भवति ॥ तदा सौ
र चांद्रयोर्मासयोर्युगपदुपक्रमो भवति स संवत्सरः ततः सौरमानेन वर्षे षट् दिनानि वर्धन्ते चांद्रमानेन षट् भक्ष्यंती
ति द्वादश दिनन्यूनं वर्षं यथा तानुक्रमयोः स्वगुप्यस्था ज्ञावो भवति पर्व पंचवर्षाणि गच्छंति ॥ तत्र मध्ये द्वौ मलमासौ भवतः ॥ ततः ॥
पुनः षष्ठः संवत्सरो भवति ॥ तदेव संवत्सरभेदेन संवत्सरादि पंचकं समामनंति ॥ १ ॥

141

रोमादीनामपि भूम्यानेककार्यत्वात् एवं चंद्रमा इति अर्कगभस्तिभ्यः मंडलरूपेभ्यः सपादर्क्षाभ्यां सपाददिनवृद्ध्ये
न ८ सर्वेषां जीवनिवहानां प्राणः अन्नमयत्वादमृतमयत्वाच्च अत एव जीव इत्युक्तो जीवस्य ९ तद्देवादयपक्ष
इति ९ दक्षिणेनैव न तु तेषां दृष्टगन्तव्यगतिरस्तीत्यर्थः कालायने कालचक्रे ईश्वराधाराश्रवणासंख्यावभिनिर

एवं चंद्रमा अर्कगभस्तिभ्यः उपरिष्टाल्लक्षयोजनतः ॥ उपलभ्यमानोऽर्कस्य संवत्सरभुक्तिं पक्षाभ्यां मा-
सभुक्तिं सपादर्क्षाभ्यां दिनेनैव पक्षभुक्तिमग्रचारी द्रुततरगमनो भुंक्ते ॥८॥ अथ चापूर्यमाणाभिश्च कला-
भिः अमराणां क्षीयमाणाभिश्च कलाभिः पितॄणामहोरात्राणि पूर्वपक्षापरपक्षाभ्यां वितन्वानः सर्व-
जीवनिवहप्राणो जीवश्चैकमेकं नक्षत्रं त्रिंशता मुहूर्तैर्भुंक्ते ॥९॥ य एष षोडशकलः पुरुषो भगवान्म-
नोमयोऽन्नमयोऽमृतमयो देवपितृमनुष्यभूतपशुपक्षिसरीसृपवीरुधां प्राणाप्यायनशीलत्वात्सर्वमय
इति वर्णयंति ॥१०॥ तत उपरिष्टात्त्रिलक्षयोजनतो नक्षत्राणि मेरुं दक्षिणेनैव कालायन ईश्वरयोजिता-
न्यष्टाविंशति ॥११॥ तत उपरिष्टादुशना द्विलक्षयोजनत उपलभ्यते पुरतः पश्चात्सहैव वार्कस्य शैघ्र्यमांद्य-
साम्याभिर्गतिभिरर्कवच्चरति लोकानां नित्यमनुकूल एव प्रायेण वर्षयंश्चारेणानुमीयते स वृष्टिविष्ट-
म्भग्रहोपशमनः ॥१२॥

तानि सहाभिजिता

तत्र फलविशेषमाह पक्षकर्कालिंगेनेन सह तथा च स्मृतिः ॥ अभिजिन्नामनक्षत्रमुपरिष्टादाषाढानामधस्तात्
श्रोणाया इत्यादि ॥११॥ पुरतः सूर्यगामोदयमानोऽनन्तरे पश्चात्तदस्तमये ॥ सह एव भुज्यमाने चारेणाक्रमस्थानवत्त्वा-
यतिक्रमणात् वृष्टेर्विष्टम्भः तस्मिन्नेव स्मात् ग्रहात् तन्नोपशामयतीति तथा ॥१२॥

तथा बुधो व्याख्यातः शुक्रस्तु पश्चात् स्थितोऽ इव वर्तनीतीति किंतु दिशो ऽ बाहुतनतस्मादिना प्रागेशं मतं सूचयति ।। १३ ।। प्रचेश
मतु ।। तुः स्वसूचकः यदि न वक्रेणाभिवर्तते तर्हि त्रिभिः पक्षैः ।। १४ ।। यदि न वक्रः स्यात्तर्हि परिवत्सरं ।। १५ ।। इति श्रीभावार्थ

ते६

उपरिष्टाद्बुधो व्याख्यातः तत उपरिष्टाद्द्विलक्षयोजनतो बुधः सोमसुत उपलभ्यमानः ।। प्रायेण शुभकृद्
यदार्काद्व्यतिरिच्येत तदातिवाताभ्रप्रायानावृष्ट्यादिभयमाशंसते ।। १३ ।। अत ऊर्ध्वमङ्गारकोऽपि योजनलक्ष
द्वितय उपलभ्यमानः त्रिभिः त्रिभिः पक्षैरेकैकशो राशीन्द्वादशानुभुङ्क्ते यदि न वक्रेणाभिवर्तते प्रायेणा
शुभग्रहोऽघशंसः ।। १४ ।। तत उपरिष्टाद्द्विलक्षयोजनान्तरगता भगवान्बृहस्पतिरेकैकस्मिन्राशौ परिवत्सरं प
रिवत्सरं चरति यदि न वक्रः स्यात् ।। प्रायेणानुकूलो ब्राह्मणकुलस्य ।। १५ ।। तत उपरिष्टाद्योजनलक्षद्वयात्प्रतीय
मानः शनैश्चर एकैकस्मिन्राशौ त्रिंशन्मासान्विलम्बमानः सर्वानेवानुपर्येति तावद्भिरनुवत्सरैः प्रा
येण हि सर्वेषामशान्तिकरः ।। १६ ।। तत उत्तरस्मादृषय एकादशलक्षयोजनान्तर उपलभ्यन्ते य एव लोका

ते२

नां शमनुभावयन्तो भगवतो विष्णोर्यत्परमं पदं प्रदक्षिणं प्रक्रमन्ति ।। १७ ।। इति श्रीभागवते पञ्चमस्कन्धे द्वावि

व२२

शतितमोऽध्यायः ।। २२ ।। श्रीशुक उवाच ।। अथ तस्मात्परतस्त्रयोदशलक्षयोजनान्तरतो यत्तद्विष्णोः परमं प
दमिति ।। यत्र ह महाभागवतो ध्रुव औत्तानपादिरग्निनेन्द्रेण प्रजापतिना कश्यपेन धर्मेण च समकालयुग्भिः
सबहुमानं दक्षिणतः क्रियमाण इदानीमपि कल्पजीविनामाजीव्य उपास्ते तस्येहानुभाव उपवर्णितः

दीपिकायां पञ्चमे द्वाविंशः ।। २२ ।। त्रयोविंशे ध्रुवः स्थानं ज्योतिश्चक्रं च शिंशुमारस्वरूपेण हरेश्च स्थि
तिरुच्यते ।। यत्र स्थितं विष्णोः पदं यत्र ध्रुव उपास्ते तिष्ठ समयः ।। सर्वकालमेव ध्रुवं तस्येति तथा तेनैव स्वरूपे ।।

143

मेढ्यां स्तंभे धान्याक्रमणपशवो बली ..... ॥ कर्मसारथिः सहायो येषां ॥ २ ॥ ईश्वरा यथा यारानस्पतनशंकेवनास्ती
तिवक्रमतोतरमाह हके विदितज्योतिरनीकं ज्योतिश्चक्रं योगधारणायां स्थितमिति शेषः ॥ ४ ॥ लांगूले अग्रभागे

स हि सर्वेषां ज्योतिर्गणानां ग्रहनक्षत्रादीनामनिमेषेणाव्यक्तरंहसा भगवता कालेन भ्राम्यमाणानां
स्थाणुरिवावष्टंभ ईश्वरेण विहितः ॥ शश्वदवभासते ॥३॥ यथा मेढीस्तंभ आक्रमणपशवः संयोजितास्त्रिभिः स
वनैर्यथास्थानं मंडलानि चरंति ॥ ॥ एवं भगणा ग्रहादय एतस्मिन्नंतर्बहिर्योगेन कालचक्र आयोजिता ध्रुव
मेवावलंब्य वायुनोदीर्यमाणा आकल्पांतं परिचंक्रमंति नभसि यथा मेघाः श्येनादयो वायुवशाः क
र्मसारथयः परिवर्तंते ॥ एवं ज्योतिर्गणाः प्रकृतिपुरुषसंयोगानुगृहीताः ॥ कर्मनिर्मितगतयो भुवि न प
तंति ॥४॥ केचिदेतज्ज्योतिरनीकं शिशुमारसंस्थानेन भगवतो वासुदेवस्य योगधारणायामनुवर्णयंति ॥
यस्य पुच्छाग्रेऽवाक्शिरसः कुंडलीभूतदेहस्य ध्रुव उपकल्पितः ॥ तस्य लांगूले प्रजापतिरग्निरिंद्रो धर्म इति
पुच्छमूले धाता विधाता च कट्यां सप्तर्षयः ॥ तस्य दक्षिणावर्तकुंडलीभूतशरीरस्य यान्युदगयनानि दक्षि
णपार्श्वे तु नक्षत्राण्युपकल्पयंति दक्षिणायनानि तु सव्ये यथा शिशुमारस्य कुंडलाभोगसन्निवेशस्य
पार्श्वयोरुभयोरप्यवयवाः समसंख्या भवंति पृष्ठे त्वजवीथी आकाशगंगा चोदरतः ॥५॥

दक्षिणे भागे उदगयनानि अभिजिदादीनि पुनर्वस्वंतानि चतुर्दश दक्षिणपार्श्वे दक्षिणायनानि पुष्यादीनि त्रया ॥

तु देवस्यानविशेषेणाविमस्य दर्शयति पुनर्वसुपुष्यावित्यादिना पुनर्वसुकटयाघमातंस्यनते तेंऽपुष्योर्दक्षिणावामस्य
य ॥ आर्द्राश्लेषे तयोर्निरंतरे अभिजिदुत्तराषाढे उत्तराषाढादक्षिणायनयोरादंश्रवणपूर्वाषाढे तयोरन्नमुखेधृति ॥
धनिष्ठामूलेव तयो ... पूर्वे मघादीनि याम्यानक्षत्राणि दक्षिणायनान्यष्टौ तानि वामपार्श्ववंक्रिषु वामपार्श्वास्थि
षु मृगशीर्षादीनि प्रातिलोम्येन पूर्वभाद्रपदांतानि यान्युदगयननक्षत्राणि उत्तरायणानि दक्षिणपार्श्व शतभिषाज्येष्ठे

पुनर्वसुपुष्यौ दक्षिणावामयोः श्रोण्योरार्द्राश्लेषे दक्षिणावामयोः पश्चिमयोः पादयोरभिजिदुत्तराषाढे दक्षिणावामयोर्नासिकयोर्यथासंख्यं श्रवणापूर्वाषाढे दक्षिणावामयोर्लोचनयोर्धनिष्ठामूलं च दक्षिणावामयोः कर्णयोः मघादीन्यष्टनक्षत्राणि दक्षिणायनानि वामपार्श्ववंक्रिषु युंजीत तथैव मृगशीर्षादीन्युदगयनानि दक्षिणपार्श्ववंक्रिषु प्रातिलोम्येन प्रयुंजीत शतभिषाज्येष्ठे स्कंधयोर्दक्षिणावामयोर्न्यसेत ॥ ६ ॥ उत्तराहनावगस्तिरधरहनौ यमो मुखेषु चांगारकः ॥ शनैश्चर उपस्थे बृहस्पतिः ककुदि वक्षस्यादित्यो हृदये नारायणो मनसि चंद्रो नाभ्यामुशना स्तनयोरश्विनौ बुधः प्राणापानयो राहुर्गले केतवः सर्वांगेषु रोमसु सर्वे तारागणाः ॥ ७ ॥ एतदु हैव भगवतो विष्णोः सर्वदेवतामयं रूपमहरहः ॥ संध्यायां प्रयतो वाग्यतो निरीक्षमाण उपतिष्ठेत ॥ नमो ज्योतिर्लोकाय कालायनायानिमिषांपतये महापुरुषायाभिधीमहीति ॥ ८ ॥ ग्रहर्क्षतारामयमाधिदैविकं पापापहं मंत्रकृतां त्रिकालं नमस्यतः स्मरतो वा त्रिकालं नश्येत तत्कालजमाशुपापं ॥ ९ ॥ इति श्रीभागवते पंचमे त्रयोदशः ॥ २३ ॥ ॥

स्कंधयोर्दक्षिणावामयोर्न्यसेत ॥ ६ ॥ यमो नूनत्वनूपः तथा नारायणोऽश्विनो च केऽऽदिगलपृष्ठे शृंगे ॥ ७ ॥ ज्योतिर्लो
काय आश्रयाय ॥ कालायनाय कालवत्स्वरूपाय नमाभिधीमहीति मंत्रेणोपतिष्ठेत ८ मंत्रकृतां पूर्वोक्तं मंत्रं जपतां ९
इति श्रीभावार्थदीपिकायां पंचमे त्रयोविंशोऽध्यायः ॥ २३ ॥

योजनायुतांतरेणप्रत्येकंकॢप्ताः॥ आयामोदैर्घ्यं कटाहस्यतावद्विस्तारेण॥ ७॥ सप्तमान्येव विवराणिवर्णयति एतेष्विति
दिसा॥ अथ्यातलइत्यतः॥ आक्रन्नेनगृह्येन एतेषुदैत्यादयोनिवसंतीत्यन्वयः॥ कथंभूतेषु अधिकःकामभोगैश्वर्यानंदश्च विभू
तिश्चसंपत्तिःतैः सुसमृद्धाभवनादयोयेषु॥ कथंभूताः नित्यप्रमुदिताः अनुरक्ताः कलत्रादयोयेषां नप्रतिहतःकामोये

मि

उपवर्णितंभूमेर्यथासंनिवेशावस्थानंअवनेरप्यधस्तात्सप्तभूविवराः॥ एकैकशो योजनायुतांतरेणायाम
विस्तारेणोपकॢप्ताः॥ अतलंवितलंसुतलंतलातलंमहातलंरसातलंपातालमिति॥ ७॥ येतेषुहिविल
स्वर्गेषुस्वर्गादप्यधिककामभोगैश्वर्यानंदविभूतिभिःसुसमृद्धभवनोद्यानक्रीडविहारेषुदैत्यदानव
काद्रवेयानित्यप्रमुदितानुरक्तकलत्रापत्यबंधुसुहृदनुचरागृहपतयईश्वरादप्यप्रतिहतकामामायावि
नोदानिवसंति॥ ८॥ येषुमहाराजमयेनमायाविनाविनिर्मिताःपुरोनानामणिप्रवरप्रवेकवि
रचितविचित्रभवनप्राकारगोपुरसभाचैत्यचत्वरायतनादिभिर्नागासुरमिथुनपा
रावतशुकसारिकाकीर्णकृत्रिमभूमिभिर्विवरेश्वरगृहोत्तमैःसमलं
कृताश्चकासंति॥ ९॥ ॥ रामायनमः॥

यांमायाविनोदोयेषां॥ ८॥ किंचहेमहाराजयेषुमयेननिर्मिताःपुरःचकासतीत्यन्वयः कथंभूताः नानायेम
णिप्रवरास्तेषांप्रवेकाःमुख्याःतैर्विरचितैःविचित्रैर्भवनादिभिः॥ तथाविवरेश्वराणांगृहोत्तमैश्चसमलंकृताः
कीदृशैः गृहोत्तमैश्चसमलंकृताःकीदृशैःगृहोत्तमैः नागाश्चअसुराश्चमिथुनभूताःपारावतादयःचतैराकी
र्णाःकृत्रिमभूमयोयेषुमःपार्श्वांतरे॥ नानात्वनतंमिथुनेविशेषणं॥ ९॥

उद्यानानि वरूथिनवाम अमरलोकश्रियम् अतिशायितानि येषु उक्ता सती सन्वयः ॥ कानि? श्रीभिः केषां ॥ कुसुमफलस्तवकाद्या
स्सभवा किसलयानि चैतैर् वनतारुचिरा विटपा येषां तत्पाविटपिनां लतानां संबंधी वालिविताना स्त्रीभिः तुल्या समिथुना च
क्रवाकादि मिथुन सहिता ये विविधा विहंगाः ॥ तथा कानां जलाशयानां च श्रीभिः कीदृशानां अमले जले पूर्णानां ॥ पुनर
पि केरे ति शायितानि फलचकुलो स्त्रयेन नक्तं सितं यज्जलाशयानां नीरं तत्सिनया निर्नीरजादीनि तेषां वने प्रकृते निकेतनं।

उद्यानानि वातितवांसमनइंद्रियानंदिमिः कुसुमफलस्तवकसुभवाकिसलयावनतरुचिरविटपविटपिनां ल
तांगालिंविताना श्रीभिः समिथुनविविधविहंगमजलाशयानाममलजलपूर्णानां फलचकुलोत्पलेन नक्तमि
तनीरनीरजकुमुदकुवलयकल्हारनीलोत्पललोहितशतपत्रादिवनेषु कृतनिकेतनानामेकविहारा
कुलमधुरविविधस्वनादिभिरिंद्रियोत्सवैरमरलोकश्रियमतिशायितानि ॥ १० ॥ यत्र ह वाव न भयमहो
रात्रादिभिः ॥ कालविभागैरुपलक्ष्यते ॥ ११ ॥ यत्र महाहिप्रवरशिरोमणयः सर्वतमः प्रबाधंते ॥ १२ ॥ न
वा एतेषु वसतां दिव्यौषधिरसरसायनान्नपानस्नानादिभिराधयो व्याधयो वलीपलितजरादयश्च देहवै
वर्ण्यदौर्गंध्यस्वेदक्लमग्लानिरिति वयोवस्थाश्च भवंति ॥ १३ ॥ न हि तेषां कल्याणानां प्रभवति कुतश्च
न मृत्युर्विना भगवत्तेजसश्चक्रापदेशात् ॥ १४ ॥

येः तेषां श्रेष्ठानामप्यदिताणां एको खंडो यो विहारः नेनाकुलाश्च ने मधुराश्च विविधस्वनादयः ते येंद्रियोत्सवाः तैश्च
यद्वा समिथुने स्यादिहंगनवैणैवसंबंधः ॥ मनइंद्रियानंदिभिवितिस्वनादीनां विशेषणानि तत्र नीरजं सामान्येन कमलं लो
हितशतपत्रं तद्विशेषः ॥ १० ॥ अहोरात्रादिभिर्यद्भयं तन्नोपलक्ष्यते सूर्याद्यभावात् ॥ ११ ॥ १२ ॥ क्लमः श्रमः ग्लानिरुत्
साहः ॥ १३ ॥ कल्याणानामेवालक्ष्यपाणां ॥ १४ ॥

यस्मिन्भगवत्तेजसि प्रविष्टे ऽसुरवधूनां पुंसवनानि गर्भाः ॥ आयत्नर्था इवेत्स्रावः पातः पंचमषष्ठयोरिति स्रावपातौ ज्ञेयौ
सवर्णेरताः स्वैरिण्यः कामिन्यः त्वसवर्णेपि न चाप्नुतिं च चलाः पुंश्चल्यः विलायनं विलापतन्न साधयित्वा संभोगसमर्थं
कृत्वा स्वीयायै ऽयसायावरणाविलासाः तन्मूर्तिकोवलोकः ॥ तेनानुरागयुक्तस्मिते तेन संलापउपगूहनं च तदादिभिः

माया

यस्मिन्प्रविष्टे ऽसुरवधूनां पुंसवनानि भयादेव स्रवंति पतंति च ॥ १५ ॥ अथातले मयपुत्रो ऽसुरो बलो निवसति
येन ह वा इह सृष्टाः ॥ षण्णवतिर्मायाः याः काश्चनाद्यापि मायाविनो धारयंति ॥ यस्य च जृंभमाणस्य मुख
तः त्रयः स्त्रीगणा उदपद्यंत स्वैरिण्यः कामिन्यः पुंश्चल्य इति ॥ या वै बिलायनं प्रविष्टं पुरुषं रसेन हाटकाख्ये
न साधयित्वा स्वविलासानुरागावलोकनस्मितसंलापोपगूहनादिभिः स्वैरं रमयंति ॥ यस्मिन्नुपयुक्ते पुरु
ष ईश्वरोऽहं सिद्धोऽहमिति अयुतमहागजबलं आत्मानमभिमन्यमानः कत्थते मदांध इव ॥ १६ ॥ ततोऽध
स्ताद्वितले हरो भगवान् हाटकेश्वरः स्वपार्षदभूतगणावृतः ॥ प्रजापतिसर्गोपबृंहणाय भवो भवान्या
सह मिथुनीभूत आस्ते ॥ यतः प्रवृत्ता सरिच्छ्रेष्ठा हाटकी नाम भवयोर्वीर्येण यत्र चित्रभानुर्मातरिश्वना
समिध्यमान ओजसा पिबति ॥ तन्निष्ठ्यूतं हाटकाख्यं सुवर्णं भूषणेनासुरेंद्रावरोधेषु पुरुषाः सह पुरुषी
भिर्धारयंति ॥ १७ ॥ ॥

यस्मिन् ॥ रसेउपयुक्ते सेविते ॥ १६ ॥ भवयोर्भवस्य भवान्याश्च चित्रभानुर्वह्निः ॥ तेन निष्ठ्यूतं त्यक्तं यत्पतनं असुरेंद्रा
णामवरोधेषु अंतःपुरेषु पुरुषीभिः स्त्रीभिः ॥ १७ ॥ ॥ ॥ ॥ रामायनमः ॥

राम ॥ राम ॥ राम ॥ ॥

१५ किल४ 149

सुतले बलिरधुनाप्यास्त इत्यन्वयः ॥ कथंभूतः सन् महेन्द्रस्य प्रियं कर्तुमिच्छता ॥ प्रथमं पराक्षिप्तमपहृतं लोकत्रयं यस्य सः पु नर्भगवतोऽनुकंपयैव ततश्च प्रवेशितः सन् कीदृशेन योऽदितेः सकाशाद्भूत्वा वटुवामनरूपेणात्तवपुः कायः तेन ॥ १८ ॥ केचित्तु सुतलराज्यं भूमिदानफलं मन्यन्ते ॥ तन्निराकरोति ॥ नो एवैतदिति ॥ यद्बिलनिलयैश्वर्यं एतद्भूमिदा नस्य साक्षात्कारः फलं न भवत्येव कुत इत्यपेक्षायामेवंभूतस्य दानस्य साक्षादपवर्गहेतुत्वादित्याह तत्तत्त्वसिद्धं दाने

ततोऽधस्तात्सुतल उदारश्रवाः पुण्यश्लोको विरोचनात्मजो बलिर्भगवता महेन्द्रस्य प्रियं चिकीर्षमाणेनादि तेर्लब्धकायो भूत्वा वटुवामनरूपेण पराक्षिप्तलोकत्रयो भगवदनुकंपयैव पुनः प्रवेशित इन्द्रादिष्वअ विद्यमानया सुसमृद्धया श्रियाऽभिजुष्टः ॥ स्वधर्मेणाराधयंस्तमेव भगवन्तमाराधनीयमपगतसाध्वस आस्तेऽधुनापि ॥ १८ ॥ नो एवैतत्साक्षात्कारो भूमिदानस्य यत्तद्भगवत्यशेषजीवनिकायानां जीवभूतात्मभू ते परमात्मनि वासुदेवे तीर्थतमे पात्र उपपन्ने परया श्रद्धया परमादरसमाहितमनसा संप्रतिपादि तस्य साक्षादपवर्गद्वारस्य यद्बिलनिलयैश्वर्यं ॥ १९ ॥ यस्य ह वाव क्षुतपतनप्रस्खलनादिषु विवशः स कृन्नामाभिगृणन्पुरुषः कर्मबंधनमंजसा विधुनोति ॥ यस्य हैव प्रतिबाधनं मुमुक्षवोऽन्यथैवोपल भंते २० ॥

तस्य तदेवाह भगवत्यशेषजीवनिकायानां जीवभूतस्यात्मा वात्मभूतश्च सर्वजीवनियंता चात्मा परमस्तस्मिन्नित्यर्थः ॥ त स्मिन्संप्रतिपादितस्य ॥ १९ ॥ किंच ॥ यस्य नाम क्षुतादिषु च विवशोऽपि सकृदपि गृणन् कर्मबंधं विधुनोति कथंभूतं यस्य प्रतिबाधनं निवृत्तिं मुमुक्षवोऽन्यथैवोपलभंते यतिविहतमर्थं योगसांख्यादिक्लेशेनानुभवंतीत्यर्थः तं कर्मबंधम्

तत्र स्मिन्भगवतां भक्तानां ज्ञातिनां च यथायथं आत्मदेहं आत्मानमेव हि यो समर्पितं सभूमि दातस्य ततः फलमि
ति पूर्वं गौरवं संचयः ॥२०॥ किंच ॥ नेदं भगवदनुकंपाफलमपि ॥ किं त्वेकांतभक्तस्यांतरायमात्रमित्याह ॥ न विश्वति ॥
भगवान्नुग्रहमुपगृहीतं वा गुरुहीनवाहन ॥ तत्र हेतुः यद्यतेति ॥ आत्मन ईश्वरस्यानुस्मृतिं त्यक्तां तीति तनथा ॥ तत्र केवलं
देवेभ्यो नोपस्य त्रपहो मार्जनादिष्ट ॥ तस्मात्तयोर्मैवं यदेवं ददातादिकं फलमिति ॥२१॥ तस्यैकांतभक्तिस्वप्रसंगेन
माह ॥ यत्तत् दति प्रसिद्धं इति वदत्या माणस्तु नावहे यत्नवयः ॥ कथंभूतः ॥ अन्तर्यागतत्र मण्डपायायेन भगवता या ज्ञा

तद्भगवतामानवतां सर्वेषामात्मनात्मनात्मन्यात्मानमेव ॥२२॥ नावैतद्भगवानानुनमस्त्रुपाव तु जग्राह ॥ यद्यत
पुनरात्मानुस्मृतिमोघणं मायामयमो वैस्वर्यमेवातत्रतेति ॥२३॥ यत्तद्भगवतानवधिगतात्यापायेना
यात्ता छलेनापस्यनस्व ज्ञा वा रा व शो षित लोकत्रयो वरुणपाशैस्तु संप्रतिमुक्तो गिरिदर्याचापविद्ध
इतिहोवाच ॥ २३ ॥ नूनं वतायं भगवानर्थेषु न निष्णातो यो सावसिंद्रो यस्य सचिवो मंत्राय वृत एकांतेता
दृहस्पतिस्तमतिहाय स्वयमुपेंद्रेणात्मानमयाचत ॥ आत्मनश्चाशिषो नो एवतादास्यमतिगंभीरव
यसः ॥ कालस्य मन्वंतरपरिवृत्तं कियल्लोकत्रयमिदं ॥२४॥ ॥

छलेनाहृतं स्वशरीरमात्रावशेषितं लोकत्रयं यस्य स तथोक्तः अतिमुक्तो वद्धः अपविद्धः पतितनिमोपिसन् ॥२२॥ वते
ति स्वेद भगवान् विद्वानपि योमाविद्धः यस्यैकांतेन वृहस्पतिः सचिवः सहायः यतो मंत्रार्थे वृतः सोपि गुरुपार्थ
प्रत्ययेन न निष्णातः न निपुणः यतउपेंद्रेणाद्वारभूतेनउपेंद्रं विहायात्मानं लोकत्रयमयाचत तं तं मंत्रमुपदेष्टृ वृहस्पतिं अ
तिहाय यानि क्रमेति वा ॥ तस्मिन्नुसन्नेस एव वरणीयोनलोकत्रयं यतस्तदतितद्वसिमाह ॥ अतिगंभीरवयसं तेव
योयस्य ॥ तस्य कालस्य मन्वंतरं तेन परिवृत्तं विपर्यस्तं लोकत्रयमिदं कियत् ॥२४॥

प्रह्लादस्यैव कृपया योनिस्तामसः इन्द्रादयस्तु दास्यमिति निरूपित विद्यपरते स्वते मतिस्त्वंविधं पदं भगवता दीयमानमपि भग
वतः खलु परमन्यदिति कृत्वा न बहु जग्राहेत्यर्थः ॥२४॥ न तु त्वमतिधीरः ॥ कृतस्तमेव बहु मन्यसे तत्राह तस्मात्पथ्यस्तु
वनीयस्तुतिनाम्ना दीनाः कृपाया वा तादृशो यस्य ॥ यद्विहीनो भगवानदत्तु गृह्णो यस्य सकोवाउपरान्तसिद्धतीति २५ ॥ य
यस्तु को सिः ॥ ननु वे भूतः चेद्बलिः तर्हि तस्य वचरिते विस्तरेणाकथ्यतां तत्राह तस्य बलेरद्य चरितं तत्तु परिष्ठादृष्टमेवि

यस्मात्तदास्य मे वास्मि पितामहः किल वैष्णवेन तत्त्वपि श्रेयं यत्तु नाकृतोभयं पदं दीयमानं भगवतः पदमिति भग
वतो पवते खलु स्वपितवि ॥२५॥ तस्य महानुभावस्यानुपथममृजितकषायः को वास्मद्विधः परिहीन
भगवदनुग्रह उपजिगमिषतीति ॥२६॥ अथ तस्यानुचरितमुपरिष्टाद्विस्तरिष्यते ॥ यस्य भगवान्स्वय
मखिलजगद्गुरुर्नारायणो द्वारि गदापाणिरवतिष्ठति ॥ निजजनानुकंपितहृदयो येनांगुष्ठेन पदा
दशकंधरो योजनायुतायुतं दिग्विजय उच्चाटितः ॥२७॥ ततोऽधस्तात्तलातले मयो नाम दानवेंद्रस्त्रिपुराधि
पतिः भगवता पुरारिणा त्रिलोकीशं चिकीर्षुणा निर्दग्धस्वपुरत्रयस्तत्प्रसादाल्लब्धपदो मायाचार्यो महा
देवेन परिरक्षितो विगतसुदर्शनभयो महीयते ॥२८॥ ततोऽधस्तान्महातले काद्रवेयाणां सर्पाणां नैका
शिरसां क्रोधवशो नाम गणः कुहकतक्षककालियसुषेणादिप्रधाना महाभोगवंतः ॥ पतत्त्रिराजाधि
पतेः पुरुषवाहादनवरतमुद्विग्नमनसः स्वकलत्रापत्यसुहृत्कुटुंबसंगेन क्वचित्प्रमत्ता विहरंति ॥२९॥

स्तरिष्यते ॥ यस्य द्वार्यवतिष्ठते निजजनेष्वनुकंपितं कृत्वा तु कोपि हृदयं यस्य द्वारपालकर्म दर्शयति ॥ येन श्री
नारायणो नवलेहापि विशनृपाकं यदुच्चाटितः केन पदा तच्चांगुष्ठेनैव ॥२७॥ यथा हरिणा दवभक्त्या बलि
स्तलेति हितः सुखमास्ते एवं महादेवभक्तोऽपि मयः तलातले सुखमास्त इत्याह ततस्तलातले त्रिपदं स्थानं येन मही
यते पूज्यते ॥२८॥ नैकशिरसामनेकफणानां गणो क्षिप्यतत्पेचयति ॥ कुहकेति महाभोगवंतो महाकायाः पुरु।

मायाविना

विबुधप्रत्यनीका दैत्याः शत्रवः सकले लोके स्थिति लोकेऽनुभावो यस्य तस्य हरेस्तेजसा सुदर्शनेन प्रतिहतो बलावलेपो वीर्यमदो
येषां बिलेशया सर्पा इव इंद्रदूत्या प्रयुक्ताभिर्मंत्ररूपाभिर्वाग्भिः ॥ एवं हि वैदिकमाख्यानं पणिभिः सरमै निगूढा गाम
न्वेष्टुं सरमां देवशुनीमिंद्रेण प्रहितां सा पणिभिः उक्ता पणयः प्राहुः किमिच्छन्ती सरमे त्यादि सा च संधिमनिच्छन्ती इंद्रस्तुति
मूर्वं कंतानुप्रति प्रतिगुरुषमाह ॥ हताः इंद्रेण पणयः शयध्वमित्यादि ते एतत्क्रुत्वा बिभ्यतीति ॥ ३० ॥ महाभोगिनो म

ततोऽधस्ताद्रसातले दैतेया दानवाः पणयो नाम निवातकवचाः कालेया हिरण्यपुरवासिन इति विबुधप्रत्य
नीका उत्पत्त्या महौजसो महासाहसिनो भगवतः सकललोकानुभावस्य हरेरेव तेजसा प्रतिहतबलावले
पा बिलेशया इव वसंति ॥ ये वै सरमयेंद्रदूत्या वाग्भिर्मंत्रवर्णाभिरिंद्राद्बिभ्यति ॥ ३० ॥ ततोऽधस्तात्पाताले
नागलोकपतयो वासुकिप्रमुखाः शंखकुलिकमहाशंखश्वेतधनंजयधृतराष्ट्रशंखचूडकंबलाश्व
तरदेवदत्तादयो महाभोगिनो महामर्षा ॥ निवसंति येषामु ह वै पंचसप्तदशशतसहस्रशीर्षाणां फ
णासु विरचिता महामणयो रोचिष्णवः पातालविवरतिमिरनिकरं स्वरोचिषा विधमंति ॥ ३१ ॥ इति श्रीभा
गवते पंचमस्कंधे चतुर्विंशोऽध्यायः ॥ २४ ॥ श्रीशुक उवाच ॥ तस्य मूलदेशे त्रिंशद्योजनसहस्रांतर आस्ते या
वै कला भगवतस्तामसी समाख्याताऽनंत इति ॥ सात्वतीया द्रष्टृदृश्ययोः संकर्षणमहमित्यभिमानल क्ष

हाफणाः महानमर्षः क्रोधो येषां पंचादिसंख्यानि शीर्षाणि येषां शीर्षाणामिति वक्तव्ये शीर्षाणामित्यार्षः ॥ ३१ ॥ इति
श्रीभावार्थदीपिकायां पंचमस्कंधे चतुर्विंशः ॥ २४ ॥ पंचविंशे ततोऽधस्तादहिशेषस्य संस्थितिः ॥ संजिहीर्षोर्यदा का
ले यत्र रुद्रसमुद्भवः ॥ १ ॥ कोवासने तः सात्वतीया ॥ सात्वतं तंत्रनिष्ठाः चतुर्विंशेन ततोऽधस्तादहशेषस्योपासने येषां संक
र्षणमित्याचक्षते तत्र व्याख्याने हेतुः द्रष्टृदृश्ययोः सम्यक्कर्षणमेकीकरणं येन तत्कुतोऽहमित्यभिमानोलक्षणं चि
ह्नमधिष्ठातृ यस्य अहंकारस्याधिष्ठानेन द्रष्टृदृश्ययोः संकर्षणात्संकर्षण इत्यर्थः ॥ १ ॥

अनंतत्वमाह यस्येति ॥ यतः शत्रूनां स एव भगवाननंतः इत्युत्तरेणान्वयः ॥ १ ॥ तामसत्वमाह ॥ यस्येदं विश्वमुपसंहर्तु-मिच्छतोमर्षेण विरचिते रुचिरे भ्रमंती भ्रुवौ तयोरंतरेण संकर्षणो नाम रुद्र उदतिष्ठत् ॥ ३ ॥ सत्वमाह ॥ यस्या-ङ्घ्रिकमलयुगलेऽरुणा विशदा नखा एव मणयस्तेषां षंडः समूहः तस्य मंडलेषु परिस्फुरंतो कुंडलानां प्रभया मंडितानि गंडस्थलानि येषु तानि ॥ ४ ॥ चारूणि अंगानि वलयैर्विलासितानि विपुलानि धवलानि सुभगानि रुचिराणि भुजा एव र

यस्येदं क्षितिमंडलं भगवतोनंतमूर्तेः सहस्रशिरस एकस्मिन्नेव शीर्षणि ध्रियमाणं सिद्धार्थ इव लक्ष्यते ॥ २
यस्य ह वा इदं कालेनोपसंजिहीर्षतो मर्षविरचितरुचिरभ्रमद्भ्रुवोरंतरेण संकर्षणो नाम रुद्र एकाद
शव्यूहस्त्र्यक्षस्त्रिशिखं शूलमुत्तंभयन्नुदतिष्ठत् ॥ ३ ॥ यस्यांघ्रिकमलयुगलारुणविशदनखमणिषं
डमंडलेष्वहिपतयः सह सात्वतर्षभैरेकांतभक्तियोगेनावनमंतः स्ववदनानि परिस्फुरत्कुंडलप्रभामंडि
तगंडस्थलान्यतिमनोहराणि प्रमुदितमनसः खलु विलोकयंति ॥ ४ ॥ यस्यैव नागराजकुमार्य
आशिष आशासानाश्चार्वंगवलयविलसितविशदविपुलधवलसुभगरुचिरभुजरजतस्तंभेष्वगुरु
चंदनकुंकुमपंकानुलेपेनावलिंपमानास्तदभिमर्शनोन्मथितहृदयमकरध्वजावेशरुचिरललि
तस्मितास्तदनुरागमदमुदितमदविघूर्णितारुणकरुणावलोकनयनवदनारविंदं सव्रीडं किल वि
लोकयंति ॥ ५ ॥ स एव भगवाननंतोनंतगुणार्णव आदिदेव उपसंहृतामर्षरोषवेगो लोकानां स्वस्त

जतस्तंभास्तेष्वगुरुचंदनकुंकुमानां पंकेनानुलेपस्तेनावलिंपमानाः तेषामभिमर्शनेनोन्मथिते हृदये मकर
ध्वजस्यावेशेन रुचिरं चललितं च स्मितं यासां ताः तस्यानुरागेण मदेन च मुदितं च तत् ॥ मदेन विघूर्णिते च लिते
च अरुणे ईषदरुणे करुणावलोके नयने यस्मिंस्तद्वदनारविंदं विलोकयंति ॥ ५ ॥ अमर्षस्य हनने रोषः क्रो

उपासनार्थमाह स्वपार्षदैः ध्यायमानः चिंत्यमानः॥ अनवरतमदेन मुदितस्यासौ विकृतविह्वललोचनश्च सुललितेन मुखरिकामृतेन वचनामृतेनाप्यायमानः स्वपार्षदान्विबुधयूथपतीनाप्याययमानः हर्षयन्॥ नीलिवाससीयस्य हलस्य ककुदि स्थिते कृतः सुभगः सुन्दरश्च भुजो येन उदारा लीला यस्य सः॥ नपरिम्लानो रागः कांतिर्यस्याः॥ तस्या नवतुलसिकाया आमोदमध्वासवेन माद्यतां मधुकराणां व्राताः॥ तेषां मधुरगीतेन श्रीर्यस्याः तां मालां कक्ष्यां वरत्रां ॥७॥ संश्लोकयामास वर्णयामास ॥८॥ अस्य जगत उत्पत्त्यादिहेतवो गुणा यदीक्षया कल्पाः॥ स्वस्वकार्यसमर्था आसन्॥ यस्य तद्रूपं ध्रुवमनंत

ध्यायमानः सुरासुरोरगसिद्धगंधर्वविद्याधरमुनिगणैरनवरतमदमुदितविकृतविह्वललोचनः सुललितमुखरिकामृतेनाप्यायमानः स्वपार्षदविबुधयूथपतीनपरिम्लानरागनवतुलसिकामोदमध्वासवेन माद्यन्मधुकरव्रातमधुरगीतश्रियं वैजयंतीं स्वां वनमालां नीलवासा एककुंडलो हलककुदि कृतसुभगसुन्दरभुजो भगवान्माहेन्द्रो वारणेन्द्र इव कांचनीं कक्षामुदारलीलो बिभर्ति ॥७॥ य एष एवमनुश्रुतो ध्यायमानो मुमुक्षूणामनादिकालकर्मवासनाग्रथितमविद्यामयं हृदयग्रंथिं सत्त्वरजस्तमोमयमंतर्हृदयं गत आशु निर्भिनत्ति तस्यानुभावान्भगवान्स्वायंभुवो नारदः सह तुंबुरुणा सभायां ब्रह्मणः संश्लोकयामास ॥८॥ उत्पत्तिस्थितिलयहेतवोऽस्य कल्पाः सत्त्वाद्याः प्रकृतिगुणा यदीक्षयासन्॥ यद्रूपं ध्रुवमकृतं यदेकमात्मन्नानाधात्कथमु ह वेद तस्य वर्त्म ॥९॥ मूर्तिं नः पुरुकृपया बभार सत्त्वं संशुद्धं सदसदिदं विभाति यत्र॥ यल्लीलां मृगपतिराददेऽनवद्यामादातुं स्वजनमनांस्युदारवीर्यः ॥१०॥

महत्तमनादि तत्र हेतुः यदेकमेव सत् आत्मन् आत्मनि नानाकार्यप्रपंचमधात्॥ तस्य तद्रूपस्य वर्त्म तत्त्वं जनः ॥ कथमु ह वेद न वेदेवेत्यर्थः ॥९॥ न हि केवलमसौ शुद्धसत्त्वमूर्तिः सत्त्वात्मिकां तनुं नः मूर्तिमिति यत्र देहे सदसदिदं विभाति सः॥ नोऽस्माकं भक्तानां बहुकृपया संशुद्धं सत्त्वं मूर्तिं बभार स्वजनानां मनांस्यादातुं वशीकर्तुं कृतां यस्य लीलां मृगपतिः सिंहः आददे शिक्षितवान्॥ यतः उदाराणि वीर्याणि यस्य तस्मादनवद्यसुन्दरः कामाश्रये दिव्य(?) नेत्राणां वयः॥ यद्वा कृपयेत्यत्र हेतुः॥ यय स्मा

स्वजनानां मनांस्यादातुं लीलामाददे ॥ मृगपतिः सिंहोदारवीर्यः ॥ यद्वा स्वजनमनांसि मृगाः कामयमानाः तेषां पतिः सुखः ॥१०॥

155

किंच आस्तां तत्कृपया वशुर्यावर्णनं तद्भजनं च तत्रासौदार्यमेवानिर्विचित्रमित्याह । यस्य नाम यदि पतितो महापातकमप्य नुकीर्तयेत् । न हि संश्रुयेदिति किं तु वक्तव्यमेव तोसावेव शरणं मुमुक्षोरित्याह । सद्योहं ति कथमनुकीर्तयेत् । अयतः श्रुतं वा सुकस्माद्वा आर्तो वा सन् प्रलंभनाद्वा पतितो वा मानुषोपाददयः ॥ ११ ॥ गिर्यादिसहितं भूगोलं सत्वानि प्राणिनः । सहस्र जिह्वोपि को वा गणयेत ॥ १२ ॥ दुरन्तवीर्यं च उरुगुणस्य अनुभावो यस्य स तथा स च सर्व मायया भूमेर्मूले स्थितः । तिष्ठ

यन्नाम श्रुतमनुकीर्तयेदकस्मादार्तो वा यदि पतितः प्रलंभनाद्वा । हंत्यंहः सपदि नृणामशेषमन्यं कं शेषाद्भगवत आश्रयेन्मुमुक्षुः ॥ ११ ॥ मूर्धन्यर्पितमणुवत्सहस्रमूर्ध्नो भूगोलं सगिरिसरित्समुद्रसत्वं । आनंत्यादनिमितविक्रमस्य भूम्नः को वीर्याण्यधिगणयेत्सहस्रजिह्वः ॥ १२ ॥ एवंप्रभावो भगवाननंतो दुरंतवीर्योरुगुणानुभावः । मूले रसायाः स्थित आत्मतंत्रो यो लीलया क्ष्मां स्थितये बिभर्ति ॥ १३ ॥ एता ह्येवेह नृभिरुपगंतव्या गतयो यथाकर्मविनिर्मिताः । यथोपदेशमनुवर्णिताः कामान्कामयमानैः ॥ १४ ॥ एतावतीर्हि राजन्पुंसः प्रवृत्तिलक्षणस्य धर्मस्य विपाकगतय उच्चावचा विसदृशा यथाप्रश्नं व्याचख्ये किमन्यत्कथयाम इति ॥ १५ ॥ इति श्रीभागवते महापुराणे पंचमस्कंधे पंचविंशोध्यायः ॥ २५ ॥

२५

नियात्मतंत्रैः आत्माधारात् ॥ १३ ॥ उक्तस्य लोकविभागस्योपयोगं वदन्नुपसंहरति । एता ह्येवं इह कामयमानैर्नृभिरुपगन्तव्या इत्यन्वयः ॥ १४ ॥ तस्य प्रपंचः एतावतीरेतावन्त एवमेताः । विपाकगतयः फलभूता गतयः ता व्याचक्षे च स्येव्याख्यातवानस्मि ॥ १५ ॥ इति श्रीभावार्थदीपिकायां पंचमस्कंधे पंचविंशो ध्यायः ॥ २५ ॥ राम ॥ राम ॥

षड्विंशे तु ततो भूस्त्वा नरकस्थितिरुच्यते ॥ पापिनो यत्र दह्यंते यमदूतैर्यथायथं ॥ १ ॥ पुंसां गतय उच्चावचा विसदृशा इति भोगवैचित्र्यमुक्तं तदेतत्कुत इति पृच्छति महर्ष इति ॥ कर्मणः समानत्वे पि श्रद्धावैचित्र्यात्फलवैचित्र्यमिति परिहरति त्रिगुणत्वादिति सात्विक्या श्रद्धया कर्तुः ॥ सुखित्वं राजस्या सुखित्वं च तामस्या दुःखित्वं मूढत्वं च तथापि तासां श्रद्धानां तारतम्यात् सुखादितारतम्यं सर्वेषामिति पर्थः ॥ १ ॥ प्रतिषिद्धमिति येथः स एवं लक्षणाय स्य अधर्मस्य कर्तुः श्रद्धा

राजोवाच ॥ महर्ष एतद्वैचित्र्यं लोकस्य कथमिति ॥ ऋषिरुवाच ॥ त्रिगुणत्वात्कर्तुः श्रद्धया कर्मगतयः पृथग्विधाः ॥ सर्वा एव सर्वस्य तारतम्येन भवंति ॥ १ ॥ अथेदानीं प्रतिषिद्धलक्षणस्याधर्मस्य तथैव कर्तुः श्रद्धाया वैसादृश्यात्कर्मफलं विसदृशं भवति ॥ या ह्यनाद्यविद्यया कृतकामानां तत्परिणामलक्षणाः सृतयः सहस्रशः प्रवृत्तास्तासां प्राचुर्येणानुवर्णयिष्यामः २ ॥ राजोवाच ॥ नरका नाम भगवन्किं देशविशेषा अथवा बहिस्त्रिलोक्या आहोस्विदंतराल इति ३ ऋषिरुवाच ॥ अंतराल एव त्रिजगत्यास्तु दिशि दक्षिणस्यामधस्ताद्भूमेरुपरिष्टाच्च जलाद्यस्यामग्निष्वात्तादयः ॥ पितृगणा दिशि स्वानां गोत्राणां परमेण समाधिना सत्या एवाशिष आशासाना वसंति ॥ ४ ॥ यत्र ह वाव भगवान्पितृराजो वैवस्वतः स्वविषयं प्रापितेषु स्वपुरुषैर्जंतुषु संपरेतेषु यथाकर्मावद्यं दोषमेवानुल्लंघितभगवच्छासनः सगणो दमं धारयति ॥ ५ ॥ ॥

वैसादृश्यं लक्षणं तस्मात् ॥ तत्रापि काश्चन दर्शयितुमाह ॥ अनाद्यविद्याकृतानां कामानां याः सृतयो नरकाः । तासां ताः अथेदानीं प्राचुर्येणानुवर्णयिष्याम इत्यन्वयः ॥ २ ॥ किं भूमावेव देशविशेषाः त्रिलोक्या ब्रह्मांडाद्बहिर्वा आवरणेषु मध्ये अंतराले वा भूमिव्यतिरिक्ते ॥ ३ ॥ ४ ॥ यथाकर्मानुसृत्य कर्मदोषमनतिक्रम्य ॥ दोषमेव दमं पापफलं दंडं करोति ॥ अनुल्लंघितं भगवच्छासनं येन ॥ ५ ॥

मतांतरेणाष्टाविंशतिमाह ॥ ६ ॥ पापभेदेन तत्तन्नरकयातनाभेदं प्रपंचयति यस्त्विहवेत्यादिना यावत्समाप्तेः पीग्रमा ।

तत्र हैके नरकानेकविंशतिं गणयंति ॥ अथ तांस्ते राजन्नामरूपलक्षणतोऽनुक्रमिष्यामः ॥ तामिस्रोंऽधतामिस्रो रौरवो महारौरवः ॥ कुंभीपाकः कालसूत्रमसिपत्रवनं सूकरमुखमंधकूपः कृमिभोजनः संदंशस्तप्तसूर्मिर्वज्रकंटकशाल्मली वैतरणी पूयोदः प्राणरोधो विशसनं लालाभक्षः सारमेयादनमवीचिरयःपानमिति किंच ॥ क्षारकर्दमो रक्षोगणभोजनः शूलप्रोतो दंदशूकोऽवटनिरोधनः पर्यावर्तनः सूचीमुखमित्यष्टाविंशतिर्नरका विविधयातनाभूमयः ॥ ७ ॥ तत्र यस्तु परवित्तापत्यकलत्राण्यपहरति स हि कालपाशबद्धो यमपुरुषैरतिभयानकैस्तामिस्रे नरके बलान्निपात्यते ॥ अनशनानुदपानदंडताडनसंतर्जनादिभिर्यातनाभिर्यात्यमानो जंतुर्यत्र कश्मलमासादित एकदैव मूर्छामुपयाति तामिस्रप्राये ॥ ८ ॥ एवमेवांधतामिस्रे यस्तु वंचयित्वा पुरुषं दारादीनुपयुंक्ते यत्र शरीरी निपात्यमानो यातनास्थो वेदनया नष्टमतिर्नष्टदृष्टिश्च भवति यथा वनस्पतिर्वृश्च्यमानमूलः तस्मादंधतामिस्रं तमुपदिशंति ॥ ९ ॥ यस्त्विह वा एतदहमिति ममेदमिति भूतद्रोहेण केवलं स्वकुटुंबमेवानुदिनं प्रपुष्णाति स तदिह विहाय स्वयमेव तदशुभेन रौरवे निपतति ॥ १० ॥ ॥ राम

नः एकदैव न दैव ॥ ८ ॥ पुरुषं पतिं वंचयित्वा ॥ ९ ॥ एतत् शरीरमहमिति इदं धनादि ममेति मत्वा स्वकुटुंबमेव पुष्णाति तेनाशुभेन ॥ १० ॥ ॥ राम ॥

१५

रुरवो भूत्वेति कर्मणि एवं तथाविधानां प्राणिनामित्यर्थः ॥ अतिक्रूरस्य भावऋक्षोरगाख्यस्य सत्त्वस्यापदेशः संज्ञा यस्य ॥११॥ क्रव्येण निमि
त्तेन मांसार्थमित्यर्थः ध प्राणतः सजीवानुपरंधयति पचति अपकरुणं निःकृपं ॥१५॥ खले स्थले देशे ॥१८॥ स्वधर्महा स्व

ये त्विह यथैवामुना विहिंसिता जंतवः ॥ परत्र यमयातनामुपगतं त एव रुरवो भूत्वा तथा तमेव विहिंसंति त
स्माद्रौरवमित्याहुः ॥ रुरुरिति सर्पादतिक्रूरसत्त्वस्यापदेशः ॥११॥ एवमेव महारौरवो यत्र निपतितं पुरुषं क्रव्यादा
नाम रुरवः तं क्रव्येण घातयंति यः केवलं देहंभरः ॥१२॥ यस्त्विह वा उग्रः पशून्पक्षिणो वा प्राणत उपरंधय
ति ॥ तमपकरुणं पुरुषादैरपि विगर्हितममुत्र यमानुचराः कुंभीपाके तप्ततैले उपरंधयंति ॥१३॥ यस्त्विह पि
तृविप्रब्रह्मध्रुक्स कालसूत्रसंज्ञके नरके अयुतयोजनपरिमंडले ताम्रमये तप्तखले उपर्यधस्तादग्न्यर्का
भ्यामतितप्यमानेऽभिनिवेशितः ॥ क्षुत्पिपासाभ्यां च दह्यमानांतर्बहिःशरीर आस्ते शेते चेष्टतेऽवतिष्ठति
परिधावति च ॥ यावंति पशुरोमाणि तावद्वर्षसहस्राणि ॥१४॥ यस्त्विह वै निजवेदपथादनापद्यपगतः
पाखंडं चोपगतः तमसिपत्रवनं प्रवेश्य कशया प्रहरंति ॥ तत्र हासावितस्ततो धावमा
न उभयतो धारैस्तालवनासिपत्रैः ॥ छिद्यमानसर्वांगो हा हतोऽस्मीति परमया
मूर्छितः ॥ पदे पदे निपतति स्वधर्महा पाखंडानुगतं फलं भुंक्ते ॥१५॥ यस्त्विह
वै राजा राजपुरुषो वा अदंड्ये दंडं प्रणयति ॥ ब्राह्मणे वा शरीरदंडं
स पापीयान्नरकेऽमुत्र सूकरमुखे निपतति तत्रातिबलैर्विनि
ष्पिष्यमाणावयवो यथैवेहेक्षुखंड आर्तस्वरेण स्वनय
न्क्वचिन्मूर्छितः कश्मलमुपगतो यथैवेहादृष्टदोषा उपरुद्धाः ॥१६॥

धर्मत्यागी ॥१५॥ स्वनयन् रुदन् कश्मलं मोहमुपगतो भवति अदृष्टदोषाः तेनोपरुद्धाः संतो यथा कश्मलमुपगतास्त

॥ २ ॥

159

ईश्वरेणोपकल्पिता मनुष्यरक्तपानादिलक्षणा वृत्तिर्येषां मत्कुणादीनां न विविक्ता विज्ञाता परव्यथा यैः अविवेकिभिः तेषां पुरुषेणाज्ञासमणादिभावेन विधिनिषेधपूर्वकमुपकल्पिता वृत्तिर्यस्य विविक्ता परव्यथा येन विवेकिना॥ अभिद्रुह्यमाणः हिंसिताः॥ विहता निद्रा यया निर्वृतिश्च यस्य न लब्धमवस्थानं येन स तमसि परिक्रामति॥ ९॥ यत्किंच नमनादिकं उपनतं प्राप्तं

यस्त्विह वै भूतानामीश्वरकल्पितवृत्तीनामविविक्तपरव्यथानां स्वयं पुरुषोपकल्पितवृत्तिर्विविक्तपरव्यथो व्यथामाचरति॥ स परत्रांधकूपे तदभिद्रोहेण निपतति तत्र हासौ तैर्जंतुभिः॥ पशुमृगपक्षिसरीसृपैर्मशकयूकामत्कुणमक्षिकादिभिर्ये के चाभिद्रुग्धास्तैः सर्वतोऽभिद्रुह्यमाणस्तमसि विहतनिद्रानिर्वृतिरलब्धावस्थानः परिक्रामति यथा कुशरीरे जीवः॥ ९॥ यस्त्विह वा असंविभज्याश्नाति यत्किंचनोपनतमनिर्मितपंचयज्ञो वायससंस्तुतः॥ स परत्र कृमिभोजने नरकाधमे निपतति॥ तत्र शतसहस्रयोजने कृमिकुंडे कृमिभूतः स्वयं कृमिभिरेव भक्ष्यमाणः कृमिभोजनो यावत्तदप्रत्ताप्रहुतादोऽनिर्वेशमात्मानं यातयते॥ १०॥ यस्त्विह वै स्तेयेन बलाद्वा हिरण्यरत्नादीनि ब्राह्मणस्य वापहरत्यन्यस्य वानापदि पुरुषस्तममुत्र राजन् यमपुरुषा अयस्मयैरग्निपिंडैः संदंशैः त्वचि निष्कुषंति॥ ११॥ राम

तदसंविभज्य न निर्मिताः पंचयज्ञा येन अत एव वायसैः संस्तुतः समत्वेन वर्णितः॥ कृमिभोजन कृमीनेव भुंजानः यावत्॥ तत्तया यावंति योजनानि कृमिकुंडं तावंति वर्षाणि यावद्वा तस्य पमित्यर्थः॥ अप्रत्तमसंविभक्तं अप्रहुतं चाग्नौ तत् तथा सः॥ अनिर्वेशमकृतप्रायश्चित्तं॥ १०॥ निष्कुषंति छिंदंति॥ ११॥ १८॥ ॐ रामाय नमः॥

तिग्मया तप्तया सूर्म्या प्रतिमया ॥१९॥ सर्वाभिगमः पश्वादिष्वपि गंता ॥२०॥ अपाखंडाः सत्कुलीनाः संतः द्वितीया तया चेमनवि
शेषणं नदीविशेषणमेतत् ॥ विण्मूत्रेति ॥२२॥ पशुचर्यां स्वेच्छाचारम् ॥२३॥ अतीर्थे विहितादन्यत्र विध्यंतीति ताडयंति प्राणा

यस्त्विह वा अगम्यां स्त्रियमगम्यं वा पुरुषं योषिदभिगच्छति तावमुत्र कशया ताडयंतस्तिग्मया सूर्म्या लोहमय्या
पुरुषमालिंगयंति स्त्रियं च पुरुषरूपया सूर्म्या ॥२॥ यस्त्विह वै सर्वाभिगमस्तममुत्र निरये वर्तमानं वज्रकंटक
शाल्मलीमारोप्य निष्कर्षंति ॥३॥ ये त्विह वै राजन्या राजपुरुषा वा अपाखंडा धर्मसेतून्भिंदंति ते संपरेत्य वै
तरण्यां निपतंति भिन्नमर्यादास्तस्यां निरयपरिखाभूतायां नद्यां यादोगणैरितस्ततो भक्ष्यमाणा आत्मना न
वियुज्यमानाश्चासुभिरुह्यमानाः स्वाघेन कर्मपाकमनुस्मरंतो विण्मूत्रपूयशोणितकेशन
खास्थिमेदोमांसवसावाहिन्यामुपतप्यंते ॥४॥ ये त्विह वै वृषलीपतयो नष्टशौचाचारनियमास्त्यक्तलज्जाः
पशुचर्यां चरंति ते चापि प्रेत्य पूयविण्मूत्रश्लेष्ममलापूर्णार्णवे निपतंति तदेवातिबीभत्सितमश्नंति ॥५॥ ये त्विह
वै श्वगर्दभपतयो ब्राह्मणादयो मृगयाविहारा अतीर्थे च मृगान्निघ्नंति तानपि संपरेतांल्लक्ष्यभूतान्यम
पुरुषा इषुभिर्विध्यंति ॥६॥ ये त्विह वै दांभिका दंभयज्ञेषु पशून्विशसंति तानमुष्मिंल्लो
के वैशसे नरके पतितान्निरयपतयो यातयित्वा विशसंति ॥७॥ यस्त्विह वै सवर्णां भार्यां
मपह्नाय द्विजो रेतः पाययति काममोहितः तं पापकृतममुत्र रेतःकुल्यायां पात
यित्वा रेतः संपाययंति ॥८॥ रामायनमः ॥

निरायो दर्शितः ॥२३॥ निरयपतयो यमपुरुषाः ॥२४॥ लालाभक्षमाह यस्त्विहेति रेतःपानं कारयति ॥२५॥

५५

पु५६

घं

(6)

यसद्दतायेस्वानाः सरभसं ससंभ्रमं ॥१९॥ द्रव्यविनिमये क्रयविक्रयादौ निरवकाशे निरालंबे ॥ अवीचिशब्दार्थी-
माह यत्रेति वीचिस्तरंगः न इहितस्मादवीचिः ॥२०॥ यो विप्रः तत्कलत्रं वा सुरां पिबति ॥ अयोपि वा व्रतस्थः सन् ॥

यस्त्विह वै दस्युर्वो ऽग्निदो गरदो ग्रामान् सार्थान्वा विलुंपति राजा राजभटो वा तांश्चापि हि परेत्य नयमदूता वज्र-
दंष्ट्राः श्वानः सप्तशतानि विंशतिश्च सरभसं खादंति ॥१९॥ यस्त्विह वा असत्यं वदति साक्ष्ये द्रव्यविनि-
मये दाने वा कथंचित्स वै प्रेत्य नरकेऽवीचिमत्यधःशिरा निरवकाशे योजनशतोच्छ्रायाद्गिरिमूर्ध्नः सं-
पात्यते जलमिव स्थलमश्मपृष्ठमवभासते ॥ तदवीचिमत्तिलशो विशीर्यमाणशरीरो न म्रिय-
माणः पुनरारोपितो निपतति ॥२०॥ यस्त्विह वै विप्रो राजन्यो वैश्यो वा सोमपीथस्तत्कलत्रं वा सुरां व्र-
तस्थोपि वा पिबति प्रमादतः ॥ तेषां निरयं नीतानामुरसि पदाक्रम्यास्ये वह्निना द्रवमाणं कार्ष्णायसं निषिंच-
ति ॥२१॥ अथ च यस्त्विह वा आत्मसंभावनेन ॥ स्वयमधमो जन्मतपोविद्याचारवर्णाश्रमवतो वरीय-
सो न बहु मन्येत स मृतक एव मृत्वा क्षारकर्दमे निरयेऽवाक्शिरा निपातितो दुरंता या-
तनाह्यश्नुते ॥२२॥ ॥

जन्मो वैश्यो वा सोमपीथः कृतसोमपीथः कृतसोमपानः इत्यन्वयः तयोः ॥ सोमस्थाने फलं चमसविधानान्
सोमपाननिषेधाच्च ॥ तथा च श्रुतिः ॥ यद्ग्रोधतिभीवाह्रतास्ताः संपिष्य दध्युत्सृज्य तस्मै भक्षं प्रयच्छेन्न सोम-
मिति ॥२१॥ स मृतक एव सन् ॥ मृत्वा ॥२२॥ ॥ ॐ तत्सत् श्रीयदुवीन
मः ॥ रामाय तत्र्यं नमः ॥ ॥

पुरुषस्यमेधेनहिंसयाभैरवादीन्यजंतेयाश्चस्त्रियाःकामदूयाः वदेनोगणाभूत्वायथेहतेपुरुषादास्मतः॥ सर्वमद्भुतं

येत्विहवैपुरुषाःपुरुषमेधेनयजंतेयश्चस्त्रियोन्नपशून्खादंतितांश्चतेपशवइहनिहतायमसदनेयातनयं
तोरक्षोगणाःसौनिकाइवस्वधितिनाऽवदायासृक्पिबंतिनृत्यंतिगायंतिचहृष्यमाणायथेहपुरुषादाः
२३॥ येत्विहवाअनागसोरण्येग्रामेवावैस्रंभकैरुपसृतानुपविस्रंभय्यजिजीविषून्शूलसूत्रादिषु
उपप्रोतान्क्रीडनकतयायातयंतितेपिचप्रेत्ययमयातनासुशूलादिषुप्रोतात्मानः॥ क्षुत्तृड्भ्यांचाभि
हताःकंकवटादिभिस्ततस्ततस्तिग्मतुंडैराहन्यमानाआत्मशमलंस्मरंति॥२४॥ येत्विहवैभूतान्युद्वे
जयंतिनराउल्बणस्वभावायथादंदशूकास्तेपिप्रेत्यनरकेदंदशूकाख्येनिपतंति॥ यत्रनृप
दंदशूकाःपंचमुखाःसप्तमुखाउपसृत्यग्रसंतियथाबिलेशयान्॥२५॥ येत्विहवाअंध
यावटकुसूलगुहादिषुभूतानिनिरुंधंतितथामुत्रतेष्वेवोपवेश्यसगरेणा
वह्निनाधूमेननिरुंधंति॥२६॥ यस्त्विहवाअतिथीनभ्यागतान्वागृहप
तिरसकृदुपगतमन्युर्दिधक्षुरिवपापेनचक्षुषानिरीक्षतेतस्यचा
पिनिरयेपापदृष्टेरक्षिणीवज्रतुंडागृध्राःकंकवटादयःप्रस
ह्योरुबलादुत्पाटयंति॥२७॥ रामाजभ्यंनमः

ततन्द्रुत वैस्रंभकैः विश्वासोपायैः उपविस्रंभय्य विश्वास्य ॥२४॥ बिलशयान् मूषकान् ॥२५॥ सगरेणसविषे।
णा २६ अतिथयोज्ञातपूर्वाः अभ्यागताःज्ञातपूर्वाः तान्पापेनवक्रीकृतेन ॥२७॥

163

आप्याभिमतिः धनगर्वितः अहंकृतिः अहं श्रेष्ठ इति मानी तिर्यक्‌कोत्तणाणयस्य सर्वतः गुर्वादीनपि अयं चोरयिष्यतीति।
विशंकमानः परिशुष्यमाणहृदयवदनः चयसम्यगनवगतः अयासः तस्यार्थस्योत्पादनादिभिः श्रमलेन गृह्णातीति

यस्त्विह वा आप्याभिमतिरहंकृतिः तिर्यक्प्रेक्षणः सर्वतोभिविशंकी अर्थविनाशचिंतया परिशुष्यमाणहृदयवदनो निर्वृतिमनवगतो ग्रह इवार्थमभिरक्षति स चापि प्रेत्य तदुत्पादनोत्कर्षणसंरक्षणशमलग्रहः सूचीमुखे नरके निपतति ॥ यत्र ह वित्तग्रहं पापपुरुषं धर्मराजपुरुषा वायका इव सर्वतोंगेषु सूत्रैः परिवयंति ॥२८॥ एवंविधा नरका यमालये संति शतशः सहस्रशः तेषु सर्वेषु च सर्व एवाधर्मवर्तिनो ये केचिदिहोदिता अनुदिताश्चावनिपते पर्यायेण विशंति तथैव धर्मानुवर्तिन इतरत्र इह तु पुनर्भवे त उभयशेषाभ्यां निविशंति निवृत्तिलक्षणमार्ग आदावेव व्याख्यातः ॥ एतावानेवांडकोशो यश्चतुर्दशधा पुराणेषु विकल्पित उपगीयते ॥ यत्तद्भगवतो नारायणस्य साक्षान्महापुरुषस्य स्थविष्ठं रूपं ॥ आत्ममायागुणमयमनुवर्णितमादृतः पठति शृणोति श्रावयति च उपगेयं भगवतः परमात्मनो ॥ ग्राह्यमपि श्रद्धाभक्तिविशुद्धबुद्धिर्वेद ॥२९॥ ॥

तथा परिवयंति सूत्रप्रोतान्कुर्वंति ॥२८॥ इतरत्र स्वर्गादौ इह मर्त्यलोके पुनर्भवे पुनर्जन्मनि मिश्रं उभयोः धर्माधर्मयोः शेषाभ्यां आदावेव द्वितीयस्कंधे वैराग्यानेयानीत्यादिना ॥ उपगेयं वेद पति षदे श्रद्धाभक्तिभ्यां विशुद्धा बुद्धि

यथावत्स्कृत्वा ॥ कथंभूतायं स्यास्य कस्मानीनांवतिकायांनांथानश्राश्ररामूर्तं वपु ॥ ३० ॥ इतिश्रीभावार्थी

स्कृत्वास्थूलं नथा सूक्ष्मं नृपेभगवतोयतिः ॥ स्थूलेनिर्जितमात्मा
नेष्मानैः सूक्ष्मं धियानयेदिति ॥ ३५ ॥ भूद्वीपवर्षसरिदद्रिनभःसमु
द्रपातालदिङ्नरकभागणलोकसंस्था ॥ गीतामयोतिवनृपाद्भुता
मीशवरस्य स्थूलं वपुः सकलजीवनिकायधाम ॥ ३० ॥ इतिश्रीभा
गवते महापुराणे श्रीमच्छुकदेवसंवादे नरकानुव
र्णनं नाम षड्विंशतितमोध्यायः ॥ २६
समाप्तः पंचमस्कंधः ॥
शुभमस्तु ॥
॥

दीपिकायांपंचमस्कंधेनरकानुवर्णनं नाम षड्विंशतितमोध्यायः ॥ २६ ॥ ॥ पंचमस्कंधेसमाप्तः